भाषापरिच्छेदः।

सिद्धान्तमुक्तावलीसहितः

श्रीमत् पण्डितराज विश्वनाथ पञ्चानन विरचितः।

बि, ए, उपाधिधारिणा

पण्डितकुलपतिना

श्रीजीवानन्द विद्यासागर भट्टाचार्य्येण

संस्कृतः प्रकाशितश्च।



चतुर्थ संस्करणम्।

कलिकाताराजधान्याम्

सिद्धेश्वरयन्त्रे मुद्रितः।

इं १९०२।

প্রকাশক—শ্রীজীবানন্দ বিদ্যাসাগর
২ নং রমানাথ মজুমদারের ষ্ট্রীট।
প্রিণ্টার—শ্রীসিদ্ধেশ্বর পান।
৩৮ নং শিবনারায়ণ দাসের লেন।



प्रख्यित कुलपतिः

श्रीजीवानन्दविद्यासागर बि. ए,

PANDIT JIBANANDA VIDYASAGARA B.

Superintendent Free Sanskrit College, Calcutta

नमो गणेशाय ।

कारिकावली

भाषापरिच्छेदः ।

नूतनजलधररुचये गोपवधूटीदुकूलचौराय ।
तस्मै नमः कृष्णाय संसारमहीरुहस्य बीजाय ॥१॥

चूडामणीकृतविधुर्वलयीकृतवासुकिः ।
भवो भवतु भव्याय लीलाताण्डवपण्डितः ॥

निजनिर्मितकारिकावली-मतिसंक्षिप्तचिरन्तनोक्तिभिः ।
विशदीकरवाणि कौतुकात् ननु राजीवदयावशंवदः ॥

सद्द्रव्या गुणगुम्फिता सुकृतिनां सत्कर्मणा ज्ञापिता
सत्सामान्यविशेषनित्यमिलिता भावप्रकर्षोज्ज्वला ।
विष्णोर्वक्षसि विन्दनाथकृतिना सिद्धान्तमुक्तावली
विन्यस्ता मनसो मुदं वितनुतां सद्युक्तिरेषा चिरम् ।

विघ्नविघाताय कृतं मङ्गलं शिष्यशिक्षायै निबध्नाति— नूतनेत्यादि । ननु मङ्गलं न विघ्नध्वंसं प्रति न वा समाप्तिं प्रति कारणं विनापि मङ्गलं नास्तिकादीनां ग्रन्थे निर्विघ्न-

परिसमाप्तिदर्शनादिति चेत्, न। अविगीतशिष्टाचारविषयत्वेन मङ्गलस्य सफलत्वे सिद्धे, तत्र च फलजिज्ञासायां, सम्भवति दृष्टफलकत्वेऽदृष्टफलकल्पनाया अन्याय्यत्वात्, उपस्थितत्वाच्च समाप्तिरेव हि फलं कल्प्यते। इत्यञ्च, यत्र मङ्गलं न दृश्यते तत्रापि जन्मान्तरीयं तत् कल्प्यते, यत्र च सत्यपि मङ्गले समाप्तिर्न दृश्यते, तत्र बलवत्तरो विघ्नो विघ्नप्राचुर्य्यं वा बोध्यम्। प्रचुरस्यास्यैव बलवत्तरविघ्ननिराकरणकारणत्वं, विघ्नध्वंसस्तु मङ्गलस्य द्वारमित्याहुः प्राञ्चः। नव्यास्तु मङ्गलस्य विघ्नध्वंस एव फलं, समाप्तिस्तु बुद्धिप्रतिभादिकारणकलापात्। न चैव स्वतःसिद्धविघ्नविरहवता कृतमङ्गलस्य निष्फलत्वापत्तिरिति वाच्यम् इष्टापत्तेः, विघ्नाशङ्कया तदाचरणात्, तथैव शिष्टाचरणात्। न च तस्य निष्फलत्वे तद्बोधकशिष्टाचारानुमितवेदाप्रामाण्यापत्तिरिति वाच्यम्। सति विघ्ने तन्नाशस्यैव वेदबोधितत्वात्। अत एव पापभ्रमेण कृतप्रायश्चित्तस्य निष्फलत्वेऽपि न तद्बोधकवेदाप्रामाण्यम्। मङ्गलन्तु विघ्नध्वंसविशेषे कारणं, विघ्नध्वंसविशेषे च विनायकस्तवपाठादि। क्वचिच्च विघ्नात्यन्ताभाव एव समाप्तिसाधन प्रतिबन्धकसंसर्गाभावस्यैव [illegible]जनकत्वात्। इत्यञ्च नास्तिकादिकृतग्रन्थेषु जन्मान्तरीय-[illegible]जन्यः [illegible], स्वतःसिद्धविघ्नात्यन्ताभावो वास्तीति न [illegible]चार इत्याहुः—संसारेति। संसार एव महीरुहो वृक्षस्तस्य बीजाय निमित्तकारणायेत्यर्थः, एतेन ईश्वरे प्रमाणमपि दर्शितं भवति। तथाहि यथा घटादिकार्य्यं कर्तृजन्यं तथा क्षित्यङ्कुरादिकमपि न च तत्कर्तृत्वमस्मदादीनां सम्भवतीत्यत-

द्रव्यं गुणास्तथा कर्म सामान्यं सविशेषकम्।
समवायस्तथाऽभावः पदार्थाः सप्त कीर्त्तिताः ॥२॥

स्तत्कर्तृत्वेनेश्वरसिद्धिः। न च शरीराजन्यत्वेन कर्त्रजन्यत्वसाधकेन सत्प्रतिपक्ष इति वाच्यम् अप्रयोजकत्वात्। मम तु कर्तृत्वेन कार्य्यत्वेन कार्य्यकारणभाव एव अनुकूलतर्कः "द्यावाभूमी जनयन् देव एक आस्ते विश्वस्य कर्त्ता भुवनस्य गोप्ता" इत्यादय आगमा अप्यनुसन्धेयाः ॥ १ ॥

पदार्थानानुद्देशमाह—द्रव्यं गुण इत्यादि। अत्र सप्तमस्याभावत्वकथनादेव षण्णां भावत्वं प्राप्तं, तेन भावत्वेन पृथगुपन्यासो न कृतः। एते च पदार्था वैशेषिकप्रसिद्धा नैयायिकानाम् अपि अविरुद्धाः प्रतिपादितञ्चैवमेव भाष्ये, अतएव उपमानचिन्तामणौ सप्तपदार्थभिन्नतया शक्तिसादृश्ययोः अतिरिक्तपदार्थत्वमाशङ्कितम्। ननु कथमेत एव पदार्थाः शक्तिसादृश्यादीनामप्यतिरिक्तपदार्थत्वात् तथाहि मण्यादिसमवहितेन वह्निना दाहो न जन्यते तच्छून्येन तु जन्यते तत्र मण्यादिना वह्नौ दाहानुकूला शक्तिर्नाश्यते उत्तेजकेन मण्याद्यपसारणेन च जन्यत इति कल्प्यते, एवं सादृश्यमप्यतिरिक्तं पदार्थः, तद्धि न षट्पदार्थेष्वन्तर्भवति सामान्येऽपि सत्त्वात् यथा गोत्वं नित्यं तथा अश्वत्वमपीति सादृश्यप्रतीतेः नाप्यभावः सत्त्वेन प्रतीयमानत्वादिति चेन्न मण्याद्यभावविशिष्टवह्न्यादेर्दाहादिकं प्रति स्वातन्त्र्येण मण्याद्यभावादेरेव वा हेतुत्वकल्पनेन नानन्तशक्तितत्प्रागभावध्वंसकल्पनागौरवात्। न [illegible]

परिसमाप्तिदर्शनादिति चेत्, न। अविगीतशिष्टाचारविषयत्वेन मङ्गलस्य सफलत्वे सिद्धे, तत्र च फलजिज्ञासायां, सम्भवति दृष्टफलकत्वेऽदृष्टफलकल्पनाया अन्याय्यत्वात्, उपस्थितत्वाच्च समाप्तिरेव हि फलं कल्प्यते। इत्थञ्च, यत्र मङ्गलं न दृश्यते तत्रापि जन्मान्तरीयं तत् कल्प्यते, यत्र च सत्यपि मङ्गले समाप्तिर्न दृश्यते, तत्र बलवत्तरो विघ्नो विघ्नप्राचुर्यं वा बोध्यम्। प्रचुरस्यैव बलवत्तरविघ्ननिवारणकारणत्वं, विघ्नध्वंसस्तु मङ्गलस्य द्वारमित्याहुः प्राञ्चः। नव्यास्तु मङ्गलस्य विघ्नध्वंस एव फलं, समाप्तिस्तु बुद्धिप्रतिभादिकारणकलापात्। न चैव स्वतःसिद्धविघ्नविरहवता कृतमङ्गलस्य निष्फलत्वापत्तिरिति वाच्यम् इष्टापत्तेः, विघ्नाशङ्कया तदाचरणात्, तथैव शिष्टाचरणात्। न च तस्य निष्फलत्वे तद्बोधकशिष्टाचारानुमितवेदाप्रामाण्यापत्तिरिति वाच्यम्। सति विघ्ने तन्नाशस्यैव वेदबोधितत्वात्। अत एव पापभ्रमेण कृतप्रायश्चित्तस्य निष्फलत्वेऽपि न तद्बोधकवेदाप्रामाण्यम्। मङ्गलन्तु विघ्नध्वंसविशेषे कारणं, विघ्नध्वंसविशेषे च विनायकस्तवपाठादिः। क्वचिच्च विघ्ना-[illegible]न्ताभाव एव समाप्तिसाधनं प्रतिबन्धकसंसर्गाभावस्यैव [illegible]र्यजनकत्वात्। इत्थञ्च नास्तिकादिकृतग्रन्थेषु जन्मान्तरीय-[illegible]तत्त्वम: स्वतःसिद्धविघ्नात्यन्ताभावो वास्तीति न [illegible]नार इत्याहः—संसारेति। संसार एव महीरुहो वृक्षस्तस्य बीजाय निमित्तकारणायेत्यर्थः, एतेन ईश्वरे प्रमाणमपि दर्शितं भवति। तथाहि यथा घटादिकार्यं कर्तृजन्यं तथा क्षित्यङ्कुरादिकमपि न च तत्कर्तृत्वमस्मदादीनां सम्भवतीत-

उत्क्षेपणं ततोऽवक्षेपणमाकुञ्चनं तथा ।
प्रसारणञ्च गमनं कर्माण्येतानि पञ्च च ॥ ६ ॥
भ्रमणं रेचनं स्यन्दनोर्द्ध्वज्वलनमेव च ।
तिर्य्यग्गमनमप्यत्र गमनादेव लभ्यते ॥ ७ ॥
सामान्यं द्विविधं प्रोक्तं परञ्चापरमेव च ।
द्रव्यादित्रिकवृत्तिस्तु सत्ता परतयोच्यते ॥ ८ ॥

पाधिकी भ्रान्तिरेव, तमसोऽतिरिक्तत्वेऽनन्तावयवादिकल्पनागौरवञ्च स्यात्। स्वर्णस्य यथा तेजस्यन्तर्भावस्तथा वक्ष्यते ।

गुणान् विभजते—अथ गुणा इति । एते गुणाश्चतुर्विंशतिसंख्यकाः कणादेन कण्ठतः, चशब्देन च दर्शिता । तत्र गुणत्वादिकजातिसिद्धिरग्रे वक्ष्यते ॥ ३ ॥ ४ ॥ ५ ॥

कर्माणि विभजते—उत्क्षेपणमिति । कर्मत्वजातिस्तु प्रत्यक्षसिद्धा एवमुत्क्षेपणत्वादिकमपि । नन्वत्र भ्रमणादिकमपि पञ्चकर्माधिकतया कुतो नोक्तमत आह—भ्रमणमित्यादि ॥ ६ ॥ ७ ॥

सामान्यं निरूपयति—सामान्यमिति । तल्लक्षणन्तु नित्यत्वे सति अनेकसमवेतत्वम् । अनेकसमवेतत्वं संयोगादीनामप्यस्त्यत उक्तं नित्यत्वे सतीति । नित्यत्वे सति समवेतत्वं गगनपरिमाणादीनामप्यस्त्यत उक्तम् अनेकेति । नित्यत्वे सति अनेकवृत्तित्वमत्यन्ताभावेऽप्यस्त्यतो वृत्तित्वसामान्यं विहाय समवेतत्वमित्युक्तम् । एकमात्रव्यक्तिवृत्तिस्तु न जातिः तथा चोक्तम्—

क्षित्यप्तेजोमरुद्व्योमकाला दिग्देहिनौ मनः ।
द्रव्याण्यथ गुणा रूपं रसो गन्धस्ततः परम् ॥३॥
स्पर्शः संख्या परिमितिः पृथक्त्वञ्च ततः परम् ।
संयोगश्च विभागश्च परत्वञ्चापरत्वकम् ॥ ४ ॥
बुद्धिः सुखं दुःखमिच्छा द्वेषो यत्नो गुरुत्वकम् ।
द्रवत्वं स्नेहसंस्कारावदृष्टं शब्द एव च ॥ ५ ॥

मणिप्रतिबन्धकसद्भावेऽपि कथं दाह इति वाच्यम्, उत्तेजकाभावविशिष्टमणिसामान्याभावस्य हेतुत्वात् । सादृश्यमपि न पदार्थान्तरं किन्तु तद्भिन्नत्वे सति तद्गतभूयोधर्म्मवत्त्वं, यथा चन्द्रभिन्नत्वे सति चन्द्रगताह्लादकत्वादिमत्त्वं मुखे चन्द्रसादृश्यमिति ॥ २ ॥

द्रव्याणि विभजते—क्षित्यबिति । क्षितिः पृथिवी आपो जलानि तेजो वह्निः मरुत् वायुः व्योम आकाशः कालः समयः दिगाशा देही आत्मा मनः, एतानि नव द्रव्याणि इत्यर्थः । ननु द्रव्यत्वजातौ किं मानम् ? नहि तत्र प्रत्यक्षं प्रमाणं घृततेजःप्रभृतिषु द्रव्यत्वाग्रहादिति चेन्न कार्य्यसमवायिकारणतावच्छेदकतया, संयोगस्य विभागस्य वा समवायिकारणतावच्छेदकतया च तत्सिद्धेरिति । ननु दशमं द्रव्यं तमः कुतो नोक्तं तद्धि प्रत्यक्षेण गृह्यते तस्य च रूपवत्त्वात् कर्म्मवत्त्वाच्च द्रव्यत्वं तच्च गन्धशून्यत्वात् न पृथिवी, नीलरूपवत्त्वाच्च न जलादिकं, तत्प्रत्यक्षे चालोकनिरपेक्षं चक्षुः कारणम् इति चेन्न आवश्यकतेजोऽभावेनोपपत्तौ द्रव्यान्तरकल्पनाया अन्याय्यत्वात् रूपवत्ताप्र-

उत्क्षेपणं ततोऽवक्षेपणमाकुञ्चनं तथा ।
प्रसारणञ्च गमनं कर्माण्येतानि पञ्च च ॥ ६ ॥
भ्रमणं रेचनं स्यन्दनोर्द्ध्वज्वलनमेव च ।
तिर्य्यग्गमनमप्यत्र गमनादेव लभ्यते ॥ ७ ॥
सामान्यं द्विविधं प्रोक्तं परञ्चापरमेव च ।
द्रव्यादित्रिकवृत्तिस्तु सत्ता परतयोच्यते ॥ ८ ॥

पाधिकी भ्रान्तिरेव, तमसोऽतिरिक्तत्वेऽनन्तावयवादिकल्पनागौरवञ्च स्यात्। स्वर्णस्य यथा तेजस्यन्तर्भावस्तथा वक्ष्यते ।

गुणान् विभजते—अथ गुणा इति। एते गुणाश्चतुर्विंशतिसंख्यकाः कणादेन कण्ठतः, चशब्देन च दर्शिताः। तत्र गुणत्वादिजातिसिद्धिरग्रे वक्ष्यते ॥ ३ ॥ ४ ॥ ५ ॥

कर्माणि विभजते—उत्क्षेपणमिति। कर्मत्वजातिस्तु प्रत्यक्षसिद्धा एवमुत्क्षेपणत्वादिकमपि । नन्वत्र भ्रमणादिकमपि पञ्चकर्माधिकतया कुतो नोक्तमत आह—भ्रमणमित्यादि ॥ ६ ॥ ७ ॥

सामान्यं निरूपयति—सामान्यमिति। तल्लक्षणन्तु नित्यत्वे सति अनेकसमवेतत्वम्। अनेकसमवेतत्वं संयोगादीनामप्यस्तीत उक्तं नित्यत्वे सतीति। नित्यत्वे सति समवेतत्वं गगनपरिमाणादीनामप्यस्तीत उक्तम् अनेकेति। नित्यत्वे सति अनेकवृत्तित्वमत्यन्ताभावेऽप्यस्तीतो वृत्तित्वसामान्यं विहाय समवेतत्वमित्युक्तम्। एकमात्रव्यक्तिवृत्तिस्तु न जातिः तथा चोक्तम्—

घटादीनां कपालादौ द्रव्येषु गुणकर्मणोः।
तेषु जातेश्च सम्बन्धः समवायः प्रकीर्त्तितः ॥११॥

स्वत एव व्यावृत्तः तेन तत्र विशेषान्तरापेक्षा नास्तीति भावः ॥ १० ॥

समवायं दर्शयति—घटादीनामिति। अवयवावयविनोर्जातिव्यक्त्योर्गुणगुणिनोः क्रियाक्रियावतोर्नित्यद्रव्यविशेषयोश्च यः सम्बन्धः स समवायः. समवायत्वं नित्यसम्बन्धत्वं तत्र प्रमाणन्तु गुणक्रियादिविशिष्टबुद्धिर्विशेषणविशेष्यसम्बन्धविषया विशिष्टबुद्धित्वात्। दण्डी पुरुष इति विशिष्टबुद्धिवत् इत्यनुमाने संयोगादिबाधात् समवायसिद्धि। न च स्वरूपसम्बन्धेन सिद्धसाधनम् अर्थान्तर वा, अनन्तस्वरूपाणां सम्बन्धत्वकल्पने गौरवात् लाघवादेकसमवायसिद्धि.। न च समवायस्यैकत्वे वायौ रूपवत्ताबुद्धिप्रसङ्ग. तत्र रूपसमवायसत्त्वेऽपि रूपाभावात्। न चैवम् अभावस्य वैशिष्ट्यं सम्बन्धान्तरं सिध्येदिति वाच्यं तस्य नित्यत्वे भूतले घटानयनानन्तरमपि घटाभावबुद्धिप्रसङ्गात् घटाभावसम्बन्धस्य तत्र सत्त्वात् तस्य नित्यत्वात्, अन्यथा देशान्तरेऽपि तत्प्रतीतिर्न स्यात् वैशिष्ट्यस्य च तत्र सत्त्वात्, मम तु मते घटे पाकरक्ततादशायां श्यामरूपस्य नष्टत्वान्न तद्वत्ताबुद्धिः वैशिष्ट्यस्यानित्यत्वे त्वनन्तवैशिष्ट्यकल्पने तत्रैव गौरवम् इत्थञ्च तत्तत्कालीनतत्तद्भूतलादिकं तत्तदभावानां सम्बन्धः। ११ ॥

अभावस्तु द्विधा संसर्गान्योन्याभावभेदतः ।
प्रागभावस्तथा ध्वंसोऽप्यत्यन्ताभाव एव च ॥
एवं त्रैविध्यमापन्नः संसर्गाभाव इष्यते ॥१२॥

अभावं विभजते—अभावस्त्विति। अभावत्वं द्रव्यादिषट्कान्योऽन्याभाववत्त्वम्। संसर्गेति। संसर्गाभावान्योन्याभावभेदादित्यर्थः। अन्योन्याभावस्यैकविधत्वात् तद्विभागाभावात् संसर्गाभावं विभजते—प्रागभाव इति। संसर्गाभावत्वम् अन्योन्याभावभिन्नाभावत्वम्, अन्योन्याभावत्वं, तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वं, विनाश्यभावत्वं प्रागभावत्वं, जन्याभावत्वं ध्वंसत्वं, नित्यसंसर्गाभावत्वम् अत्यन्ताभावत्वम्। यत्र तु भूतलादौ घटादिकमपसारितं पुनरानीतञ्च तत्र घटकालस्य सम्बन्धाघटकतया अत्यन्ताभावस्य नित्यत्वेऽपि घटकाले न घटात्यन्ताभावबुद्धिः। तत्र उत्पादविनाशशाली चतुर्थोऽयमभाव इति केचित्। अत्र ध्वंसप्रागभावयोरधिकरणे नात्यन्ताभाव इति प्राचीनमतम्। श्यामघटे रक्तो नास्तीति रक्तघटे श्यामो नास्तीति धीश्च प्रागभावं ध्वंसञ्चावगाहते न तु तदत्यन्ताभावम्। नव्यास्तु तत्र विरोधे मानाभावात् ध्वंसादिकालावच्छेदेनाप्यत्यन्ताभावो वर्त्तत इति प्राहुः। नन्वस्तु अभावानामधिकरणात्मकत्वं लाघवादिति चेन्न अनन्ताधिकरणात्मकत्वकल्पनामपेक्ष्यातिरिक्तकल्पनाया एव लघीयस्त्वात्। एवञ्च आधाराधेयभावोऽप्युपपद्यते। एवञ्च तत्तच्छब्दगन्धरसाद्यभावानां प्रत्य-

सप्तानामपि साधर्म्यं ज्ञेयत्वादिकमुच्यते ॥१३ ।
द्रव्यादयः पञ्च भावा अनेके समवायिनः ।
सत्तावन्तस्त्रयस्त्वाद्या गुणादिर्निर्गुणक्रियः ॥१४॥

क्षत्वमुपपद्यते, अन्यथा तत्तदधिकरणानां तत्तदिन्द्रियाग्राह्यत्वादप्रत्यक्षत्वं स्यात्। एतेन ज्ञानविशेषकालविशेषाद्यात्मकत्वमत्यन्ताभावस्येति प्रत्युक्तम् अप्रत्यक्षत्वापत्तेः ॥ १२ ॥

इदानीं पदार्थानां साधर्म्यं वैधर्म्यञ्च वक्तुमुपक्रमते— सप्तानामित्यादि। समानो धर्मो येषां ते सधर्माणः, तेषां भावः साधर्म्यं, समानो धर्म इति फलितार्थः। एवं विरुद्धो धर्मो येषां ते विधर्माणः, तेषां भावः वैधर्म्यं, विरुद्धो धर्म इति फलितार्थः। ज्ञेयत्वं ज्ञानविषयता सा च सर्वत्रैवास्ति ईश्वरज्ञानविषयताया केवलान्वयित्वात्। एवम् अभिधेयत्वप्रमेयत्वादिकं बोध्यम् ।१३

द्रव्येति। द्रव्यगुणकर्मसामान्यविशेषाणां साधर्म्यमाह— [illegible] समवायित्वञ्च। अत्रानेकत्वम् [illegible]

[illegible]

[illegible]

[illegible]

[illegible]

पुनरु[illegible]ाव्याप्तिवारणाय सत्तान्यत्वेति । जातिम-
भेदगर्भा निर्विशेषा इत्यतो न दोषः. द्रव्यगुणान्यतरत्व-
मात्राय तद्वैवाव्याप्तिवारणाय जातीति अभावेऽतिव्याप्ति-
वारणाय भावत्वमिति गुणवृत्तित्व सत्तासाक्षाद्व्याप्यजाति-
व्यत्वं तच्छून्यत्वं पञ्चानामर्थः । १४ ॥

सामान्येति । सामान्यानधिकरणत्वं सामान्यादी-नामित्यर्थः । पारिमाण्डल्येति । पारिमाण्डल्यम् अणुपरिमाणं कारणत्वं तद्भिन्नानामित्यर्थः । अणुपरिमाणं न तु कस्यापि कारणं तद्धि स्वाश्रयारब्धद्रव्यपरिमाणारम्भकं भवेत्, तच्च न सम्भवति परिमाणस्य स्वसमानजातीयोत्-कृष्टपरिमाणजनकत्वात् महदारब्धस्य महत्तरत्ववत् अणु-जन्यस्याणुतरत्वप्रसङ्गात् । एवं परममहत्परिमाणम् अती-न्द्रियसामान्यं विशेषश्चेति बोध्यम् । इदमपि योगि-

अन्यथासिद्धिशून्यस्य नियता पूर्ववर्त्तिता ।
कारणत्वं भवेत् तस्य त्रैविध्यं परिकीर्त्तितम् ॥१६॥
समवायिकारणत्वं ज्ञेयमथाप्यसमवायिहेतुत्वम् ।
एवं न्यायनयज्ञैस्तृतीयमुक्तं निमित्तहेतुत्वम् ॥१७॥
यत्समवेतं कार्य्यं भवति ज्ञेयन्तु समवायिजनकं तत् ।
तत्रासन्नं जनकं द्वितीयमाभ्यां परं तृतीयं स्यात् ॥१८॥

प्रत्यक्षे विषयस्य न कारणत्वं ज्ञायमानसामान्यं न प्रत्यासत्ति ज्ञायमानं लिङ्गं नानुमितिकारणम् इत्यभिप्रायेण । मानसप्रत्यक्षे आत्ममहत्त्वस्य कारणत्वात् महत्परिमाणं कालादेर्नोध्यं तस्यापि न कारणत्वमित्याचार्य्याणामाशय इत्यन्ये तन्न ज्ञानातिरिक्तं प्रति कारणताया एव आचार्य्यैरुक्तत्वात् ॥ १५ ॥

ननु कारणत्वं किम्? अत आह—अन्यथेति । तस्य कारणत्वस्य तत्र समवायिकारणे आसन्नं प्रत्यासन्नं कारणं द्वितीयमसमवायिकारणमित्यर्थः । अत्र यद्यपि तुरीतन्तुसंयोगानां पटसमवायिकारणत्वं स्यात्, एवं वेगादीनामपि अभिघाताद्यसमवायिकारणत्वं स्यात्, एवं ज्ञानादिकमिच्छाद्यसमवायिकारणं स्यात्, तथापि पटासमवायिकारणलक्षणे तुरीतन्तुसंयोगभिन्नत्वं देयं, तुरीतन्तु संयोगस्तु तुरीपटसंयोगं प्रत्यसमवायिकारणं भवत्येव, एवं वेगादिकं वेगस्पन्दाद्यसमवायिकारणं भवत्येवेति तत्तत्कार्य्यासमवायिकारणलक्षणे तत्तद्भिन्नत्वं न देयम्, आत्मविशेषगुणानान्तु कुत्राप्यसमवायिकारणत्वं नास्ति,

येन सह पूर्वभावः कारणमादाय वा यस्य ।
अन्यं प्रति पूर्वभावे ज्ञाते यत्पूर्वभावविज्ञानम् ॥ १९
जनकं प्रति पूर्ववर्त्तितामपरिज्ञाय न यस्य गृह्यते ।
अतिरिक्तमथापि यद्भवेन्नियतावश्यकपूर्वभाविनः ॥ २०

तेन तद्भिन्नत्वं सामान्यलक्षणे देयमेव अत्र समवायिकारणे प्रत्यासन्नं द्विविधं कार्य्यैकार्थप्रत्यासत्त्या कारणैकार्थ-प्रत्यासत्त्या च आद्यं यथा घटादिकं प्रति कपालसंयोगादिकम्, तत्र कार्य्येण घटेन सह कारणस्य कपालसंयोगस्य एकस्मिन् कपाले प्रत्यासत्तिरस्ति, द्वितीयं यथा घटरूपं प्रति कपालरूपमसमवायिकारणं तत्र घटरूपं प्रति कारणं घटः तेन सह कपालरूपस्य एकस्मिन् कपाले प्रत्यासत्ति-रस्ति, तथा च क्वचित् समवायसम्बन्धेन, क्वचित् स्वसमवायि-समवायसम्बन्धेनेति फलितार्थः। इत्थञ्च कार्य्ये कार्य्य-कारणैकार्थान्यतरप्रत्यासत्त्या कारणं ज्ञानादिभिन्नमसम-वायिकारणमिति सामान्यलक्षणं पर्य्यवसन्नम् आभ्यां समवायिकारणासमवायिकारणाभ्यां भिन्नं कारणं तृतीयं निमित्तकारणमित्यर्थः ॥ १६ ॥ १७ ॥ १८ ॥

इदानीमन्यथासिद्धत्वमेव कियतां पदार्थानां तदाह—येन इत्यादिना। यत् कार्य्यं प्रति कारणस्य पूर्ववर्त्तिता येन रूपेण गृह्यते, तत् कार्य्यं प्रति तद्रूपमन्यथासिद्धमिति भावः. यथा घटं प्रति दण्डत्वमिति। द्वितीयमन्यथासिद्ध-माह—कारणमिति। यस्य स्वातन्त्र्येणान्वयव्यतिरेकौ न स्तः

एते पञ्चान्यथासिद्धा दण्डत्वादिकमादिमम् ।
घटादौ दण्डरूपादि द्वितीयमपि दर्शितम् ॥ २१॥

किन्तु स्वकारणमादायैव अन्वयव्यतिरेकौ गृह्येते तदन्यथासिद्धं यथा दण्डरूपम् । तृतीयमाह—अन्यं प्रतीति । अन्यं प्रति पूर्ववर्त्तित्वं गृहीत्वैव यस्य यत् कार्य्यं प्रति पूर्ववर्त्तित्वं गृह्यते तस्य तत् कार्य्यं प्रत्यन्यथासिद्धत्वं यथा घटादिकं प्रत्याकाशस्य. आकाशस्य हि घटादिकं प्रति आकाशत्वेन कारणत्वं स्यात् आकाशत्वं च शब्दसमवायिकारणत्वम्, अत. शब्दं प्रति जनकत्वं गृहीत्वैव घटादिकं प्रति जनकत्वं ग्राह्यमतस्तदन्यथासिद्धम् । शब्दाश्रयत्वेन कारणत्वे काऽन्यथासिद्धिः? इति चेत् पञ्चमीति गृहाण । अथाकाशस्य शब्दं प्रति जनकत्वे किमवच्छेदकम्? इति चेत् कवत्वादिकं विशेषपदार्थो वेति । चतुर्थमन्यथासिद्धमाह—जनकं प्रतीति । यत्कार्य्यजनकं प्रति पूर्ववर्त्तित्वं गृहीत्वैव यस्य यत् कार्य्यं प्रति पूर्ववर्त्तित्वं गृह्यते तस्य तत् कार्य्यं प्रत्यन्यथासिद्धत्वं, यथा कुलालपितुर्घटं प्रति, तस्य कुलालपितृत्वेन घटं प्रति जनकत्वेऽन्यथासिद्धि, कुलालत्वेन जनकत्वे त्विष्टापत्तिः कुलालमात्रस्य घटं प्रति जनकत्वात् । पञ्चममन्यथासिद्धमाह—अतिरिक्तमिति । नियतावश्यकपूर्वभाविनः अवश्यक्लृप्तनियतपूर्ववर्त्तिन एव कार्य्यसम्भवे तद्भिन्नमन्यथासिद्धमित्यर्थः । अत एव प्रत्यक्षे महत्त्वकारणत्वेऽनेकद्रव्यवत्त्वमन्यथासिद्धं तत

तृतीयन्तु भवेद् व्योम कुलालजनकोऽपरः ।
पञ्चमो रासभादिः स्यादेतेष्वावश्यकस्त्वसौ ॥२२॥
समवायिकारणत्वं द्रव्यस्यैवेति विज्ञेयम् ।
गुणकर्ममात्रवृत्ति ज्ञेयमथाप्यसमवायिहेतुत्वम् ॥२३॥
अन्यत्र नित्यद्रव्येभ्य आश्रितत्वमिहोच्यते ।

नि महत्त्वमवश्यं क्लृप्तं तेनानेकद्रव्यवत्त्वमन्यथासिद्धम् । न च वैपरीत्ये किं विनिगमकम् ? इति वाच्यं, महत्त्वत्वस्य कारणतावच्छेदकत्वे लाघवात् ॥ १९ ॥ २० ॥ २१ ॥

रासभादिरिति । यद्यपि घटव्यक्तिं प्रति रासभस्य नियत-पूर्ववर्त्तित्वमस्ति तथापि घटजातीयं प्रति नियत-कारणभावैर्दण्डादिभिरेव तद्व्यक्तेरपि सम्भवे रासभो-ऽन्यथासिद्ध इति भावः । एतेष्विति । एतेषु पञ्चसु अन्यथासिद्धेषु मध्ये पञ्चमोऽन्यथासिद्ध आवश्यकः तेनैव परेषां चरितार्थत्वात्, तथा हि दण्डादिभिरवश्यक्लृप्त-नियतपूर्ववर्त्तिभिरेव कार्य्यसम्भवे दण्डत्वादिकमन्यथा-सिद्धम् । न च वैपरीत्ये किं विनिगमकम् ? इति वाच्यम् । दण्डत्वस्य कारणत्वे दण्डघटितपरम्परायाः सम्बन्धत्व-कल्पने, गौरवात् एवमन्येषामप्यनेन चरितार्थत्वमभ्या-सात् ॥ २२ ॥

गुणकर्मेति । असमवायिकारणत्वं गुणकर्मभिन्नानां वैधर्म्यं न तु गुणकर्मणोः साधर्म्यम् इत्यत्रापि तात्पर्य्यम् । अथवा असमवायिकारणवृत्तिसत्ताभिन्नजातिमत्त्वं तदर्थः

क्षित्यादीनां नवानान्तु द्रव्यत्वगुणयोगिता ॥२४॥
क्षितिर्जलं तथा तेजः पवनो मन एव च।
परापरत्वमूर्त्तत्वक्रियावेगाश्रया अमी ॥२५॥
कालखात्मदिशां सर्वगतत्वं परमं महत्।

तेन ज्ञानादीनामपि असमवायिकारणत्वविरहेऽपि न क्षति ॥ २३ ॥

अन्यत्रेति। नित्यद्रव्याणि परमाण्वाकाशादीनि विहायाश्रितत्वं साधर्म्यमित्यर्थः आश्रितत्वन्तु समवायादिसम्बन्धेन वृत्तिमत्त्वं विशेषणतया नित्यानामपि कालादौ वृत्तेः कालिकसम्बन्धाप्यसम्बन्धेन तेषामवृत्तित्वमिति परमार्थं, तेन समवायेनावृत्तावपि न क्षतिः। इदानीं द्रव्यस्यैव विशिष्य साधर्म्यं वक्तुमारभते—क्षित्यादीनामिति ॥ २४ ॥

क्षितिर्जलमिति पृथिव्यप्तेजोवायुमनसां परत्वापरत्ववत्त्वं मूर्त्तत्वं क्रियावत्त्वं वेगवत्त्वञ्च साधर्म्यम्। न च यत्र घटादौ परत्वमपरत्वं वा नोत्पन्नं तत्राव्याप्तिरिति वाच्यं, परत्वादिसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात्। मूर्त्तत्वम् अपकृष्टपरिमाणवत्त्वम्, तच्च तेषामेव। गगनादिपरिमाणस्य कुतोऽप्यपकृष्टत्वाभावात्, पूर्ववत् कर्म्मवत्त्वम्, कर्म्मसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वं वेगवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वञ्च बोध्यम् ॥ २५ ॥

कालेति। कालाकाशात्मदिशां सर्वगतत्वं सर्वमूर्त्त-

क्षित्यादिपञ्चभूतानि चत्वारि स्पर्शवन्ति हि ॥२६॥
द्रव्यारम्भश्चतुर्षु स्यादथाकाशशरीरिणाम् ।
अव्याप्यवृत्तिः क्षणिको विशेषगुण इष्यते ॥२७॥

संयोगित्वं परममहत्त्वञ्च । परममहत्त्वं जातिविशेषः अपकर्षानाश्रयपरिमाणत्वं वा । क्षित्यादीति । पृथिव्यप्तेजोवाय्वाकाशानां भूतत्वम्, तच्च बहिरिन्द्रियग्राह्यविशेषगुणवत्त्वम् । अत्र ग्राह्यत्वं लौकिकप्रत्यक्षस्वरूपयोग्यत्वं बोध्यं, तेन ज्ञातो घट इत्यादिप्रत्यक्षे ज्ञानस्याप्युपनीतभानविषयत्वात् तद्वति आत्मनि नातिप्रसङ्गः, न वा प्रत्यक्षाविषयरूपादिमति परमाण्वादावव्याप्तिः तस्यापि स्वरूपयोग्यत्वात् महत्त्वलक्षणकारणान्तरासन्निधानाच्च न प्रत्यक्षम् । अथ वा आत्मवृत्तिविशेषगुणवत्त्वं तत्त्वम् । चत्वारीति । पृथिव्यप्तेजोवायूनां स्पर्शवत्त्वम् ॥ २६ ॥

द्रव्यारम्भ इति । पृथिव्यप्तेजोवायुषु चतुर्षु द्रव्यारम्भकत्वं, न च द्रव्यानारम्भके घटादावव्याप्तिः द्रव्यसमवायिकारणवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् । आकाशशरीरिणामिति । आकाशात्मनामव्याप्यवृत्तिक्षणिकविशेषगुणवत्त्वम् आकाशस्य विशेषगुणः शब्दः स चाव्याप्यवृत्तिः, यदा किञ्चिदवच्छेदेन शब्द उत्पद्यते तदान्यावच्छेदेन तदभावस्यापि सत्त्वात्, क्षणिकत्वञ्च तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वम् । योग्यविभुविशेषगुणादीनां स्वोत्तरवर्त्तिगुणनाश्यत्वात् प्रथमशब्दस्य द्वितीय-

रूपद्रवत्वप्रत्यक्षयोगि स्यात् प्रथमत्रिकम्।
गुरुणी द्वे रसवती द्वयोर्नैमित्तिको द्रवः॥२८॥

शब्देन नाशः, एवं ज्ञानादीनामपि। ज्ञानादिकं हि आत्मनि विभौ शरीराद्यवच्छेदेनोत्पद्यते घटाद्यवच्छेदेन तदभावोऽस्त्येव। एवं ज्ञानादिकमपि क्षणद्वयावस्थायि। प्रत्यक्षाव्याप्यवृत्तिविशेषगुणवत्त्वं क्षणिकविशेषगुणवत्त्वमित्यर्थः पृथिव्यादौ रूपादिर्विशेषगुणोऽस्तीति अतोऽव्याप्यवृत्तीत्युक्तम् पृथिव्यादावव्याप्यवृत्तिसंयोगादिरस्तीति अतो विशेषगुणेत्युक्तम्। न च रूपादीनामपि कदाचित् तृतीयक्षणे नाशसम्भवात् क्षणिकविशेषगुणवत्त्व क्षित्यादावतिव्याप्तमिति वाच्यं, चतुर्थक्षणवृत्तिजन्यावृत्तिजातिमद्विशेषगुणवत्त्वस्य विवक्षितत्वात्। अपेक्षाबुद्धिः क्षणत्रयं तिष्ठति क्षणचतुष्टयन्तु किमपि ज्ञानादिकं न तिष्ठति, रूपत्वादिकन्तु क्षणचतुष्टयस्थायिन्यपि रूपादौ वर्त्तत इति व्युदासः। ईश्वरज्ञानस्य चतुःक्षणवृत्तित्वात् जन्येत्युक्तम्। यद्यात्मजीवात्मनो. साधर्म्यम्, तदा जन्येति न देयं द्वेषत्वादिकमादाय लक्षणसमन्वयात् परममहत्त्वस्य तादृशगुणत्वाच्च। चतुर्थक्षणे द्वित्वादीनामपि नाशाभ्युपगमात्, द्वित्वादीनामपि तथात्वात् तद्वारणाय—विशेषेति। त्रिक्षणवृत्तित्वं वा वाच्यम्, द्वेषत्वादिकमादायात्मनि लक्षणसमन्वयात॥ २७॥

रूपेति। पृथिव्यप्तेजसां रूपवत्त्वं द्रवत्ववत्त्वं प्रत्यक्षविषयत्वञ्चेत्यर्थः। न च चक्षुरादीनां भर्जनकपालस्थ-

आत्मानो भूतवर्गाश्च विशेषगुणयोगिनः ।
यदुक्तं यस्य साधर्म्यं वैधर्म्यमितरस्य तत् ॥२९॥

वह्नेः उष्णस्य रूपवत्त्वे किं मानम् ? इति वाच्यम् । तत्रापि तैजसत्वेन रूपानुमानात्, एवं वाय्वानीतपृथिवीजलतेजोभागानामपि पृथिवीत्वादिना रूपानुमानं बोध्यम् । न च घटादौ द्रुतसुवर्णादिभिन्ने तेजसि च द्रवत्ववत्त्वमव्याप्तमिति वाच्यं, द्रवत्ववद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् घृततैलप्रभृतिषु, पृथिवीषु, जलेषु, द्रुतसुवर्णादौ तेजसि च द्रवत्वसत्त्वात् तत्र च पृथिवीत्वादिमत्त्वात् तदादाय सर्वत्र लक्षणसमन्वयः । न च प्रत्यक्षविषयत्वं परमाण्वादावव्याप्तम् अतिव्याप्तञ्च रूपादाविति वाच्यं, चाक्षुषप्रत्यक्षविषयवृत्ति द्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् आत्मन्यतिव्याप्तिवारणाय चाक्षुषेति । गुरुणी इति । गुरुत्ववत्त्वं रसवत्त्वं पृथिवीजलयोरित्यर्थः । न च घ्राणेन्द्रियादीनां वाय्वानीतपार्थिवादिभागानाञ्च रसादिमत्त्वे किं मानम् ? इति वाच्यम् । तत्रापि पृथिवीत्वादिना तदनुमानात् । द्वयोरिति पृथिवीतेजसोरित्यर्थः । न च नैमित्तिकद्रवत्ववत्त्वं घटादौ वह्न्यादौ चाव्याप्तमिति वाच्यं, नैमित्तिकद्रवत्वसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् ॥ २८ ॥

आत्मान इति पृथिव्यप्तेजोवाय्वाकाशात्मनां विशेषगुणवत्त्वमित्यर्थः । यदुक्तमिति । ज्ञेयत्वादिकं विहाय इति बोध्यं, तत् तु न कस्यापि वैधर्म्यं, केवलान्वयित्वात् ॥ २९ ॥

स्पर्शादयोऽष्टौ वेगाख्यसंस्कारो मरुतो गुणाः ।
अष्टौ स्पर्शादयो रूपं द्रवो वेगश्च तेजसि ॥३०॥
स्पर्शादयोऽष्टौ वेगश्च गुरुत्वञ्च द्रवत्वकम् ।
रूपं रसस्तथा स्नेहो वारिण्येते चतुर्दश ॥३१॥
स्नेहहीना गन्धयुताः क्षितावेते चतुर्दश ।
बुद्ध्यादि षट्कं संख्यादि पञ्चकं भावना तथा ॥३२॥
धर्माधर्मौ गुणा एते आत्मनः स्युश्चतुर्दश ।
संख्यादिपञ्चकं कालदिशोः शब्दश्च ते च खे ॥३३॥
संख्यादयः पञ्च बुद्धिरिच्छा यत्नोऽपि चेश्वरे ।
परापरत्वे संख्याद्याः पञ्च वेगश्च मानसे ॥३४॥
तत्र क्षितिर्गन्धहेतुर्नानारूपवती मता ।

स्पर्शादय इति । ते च संख्यादयः पञ्च खे आकाशे ॥३०॥ ३१॥३२॥३३॥३४॥

साधर्म्यवैधर्म्ये निरूप्य सम्प्रति प्रत्येकं पृथिव्यादिकं निरूपयति—तत्र क्षितिरित्यादिना । गन्धहेतुरिति गन्धसमवायिकारणमित्यर्थः । यद्यपि गन्धवत्त्वमात्रं लक्षणमुचितं तथापि पृथिवीत्वजातौ प्रमाणोपन्यासाय कारणत्वमुपन्यस्तम् । तथा हि पृथिवीत्वं हि गन्धसमवायिकारणतावच्छेदकतया सिध्यति, अन्यथा गन्धत्वावच्छिन्नस्याकस्मिकत्वापत्तेः । न च पाषाणादौ गन्धाभावात् गन्धवत्त्वमव्याप्तमिति वाच्यं, तत्रापि गन्धसत्त्वात् अनुपलब्धिस्तु अनुद्भूतत्वेनाप्युपपद्यते कथमन्यथा तद्भस्मनि गन्ध उपलभ्यते? भस्मनो हि पाषाणध्वंसजन्यत्वात् पाषाणो

षड्विधस्तु रसस्तत्र गन्धस्तु द्विविधो मतः ॥३५॥
स्पर्शस्तस्यास्तु विज्ञेयो ह्यनुष्णाशीतपाकजः ।

पादानोपादेयत्वं सिध्यति, यद् द्रव्यं यद्द्रव्यारब्धं तत्तदुपादानोपादेयमिति व्याप्तेः, दृष्टञ्चेतत् ... महापटश्च मजन्ये । इत्यञ्च पाषाणपरमाणोः ... त्वात् तज्जन्यस्य पाषाणस्यापि पृथिवीत्वं, तथा च ... गन्धवत्त्वे बाधकाभावः । नानारूपेति । ... नानाजातीयं रूपं पृथिव्यामेव वर्त्तते, न तु जलादौ, शुक्लस्यैव सत्त्वात् । पृथिव्यान्तु एकस्मिन्नपि धर्मिणि ... नानारूपसम्भवात् । न च यत्र नानारूपं नोत्पन्नं तत्राव्याप्ति इति वाच्यं, रूपद्वयवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य ... त्वात्, रूपनाशवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य वा वाच्यत्वात् वैशेषिकनये पृथिवीपरमाणौ रूपनाशस्य, रूपान्तरस्य च सत्त्वात् न्यायनये घटादावपि तत्सत्त्वाल्लक्षणसमन्वयः। षड्विध इति । मधुरकटुकषायादिभेदेन यः षड्विधो रसः स पृथिव्यामेव, जले च मधुर एव रसः । अत्रापि पूर्ववद्रस-द्वयवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं लक्षणार्थोऽवसेयः । गन्धस्त्विति । द्विविध इति वस्तुस्थितिमात्रं न तु द्विविध-गन्धवत्त्वं लक्षणं द्विविधस्य व्यर्थत्वात् । द्वैविध्यञ्च सौरभा-सौरभभेदेन बोध्यम् ॥३५॥

स्पर्श इति । तस्याः पृथिव्याः अनुष्णाशीतस्पर्शवत्त्वं वायोरपि वर्त्तत इत्युक्तम्—पाकज इति । इत्यञ्च पृथिव्याः स्पर्शोऽनुष्णाशीतताज्ञापनार्थं तदुक्तम् । वस्तुतस्तु पाकज-

नित्यानित्या च सा द्वेधा नित्या स्यादणुलक्षणा॥३६॥
अनित्या तु तदन्या स्यात् सैवावयवयोगिनी।

स्पर्शवत्त्वमात्रं लक्षणम् अधिकस्य वैयर्थ्यात्। यद्यपि पाकजस्पर्शः पटादौ नास्ति तथापि पाकजस्पर्शवद्वृत्ति-द्रव्यत्वव्याप्यजातिमत्त्वमर्थो बोध्यः। नित्येति। सा पृथिवी द्विविधा नित्या अनित्या च इत्यर्थः। अणुलक्षणा परमाणु-लक्षणा पृथिवी नित्या॥ ३६॥

तदन्या परमाणुभिन्ना पृथिवी द्व्यणुकादिः सर्वोऽप्य-नित्य इत्यर्थः। सैव अनित्या पृथिव्येव अवयववतीत्यर्थः। ननु अवयविनि किं मानं परमाणुपुञ्जैरेवोपपत्तेः, न च परमाणूनामतीन्द्रियत्वात् घटादेः प्रत्यक्षं न स्यादिति वाच्यम्। एकस्य परमाणोरप्रत्यक्षत्वेऽपि तत्समूहस्य प्रत्यक्षत्वात्, यथा एकस्य केशस्य दूरे-ऽप्रत्यक्षत्वे तत्समूहस्य प्रत्यक्षत्वम्। न च एकः स्थूलो महान् घट इति बुद्धेरनुपपत्तिरिति वाच्यम्। एको महान् धान्यराशिरितिवदुपपत्तेः, मैवं, परमाणोरतीन्द्रियत्वेन तत्समूहस्य अपि प्रत्यक्षायोग्यत्वात् दूरस्थकेशस्तु नातीन्द्रियः सन्निधाने तस्यैव प्रत्यक्षत्वात्। न च तदानीम् अदृश्यपर-माणुपुञ्जात् दृश्यपरमाणुपुञ्जस्योत्पन्नत्वात् न प्रत्यक्षत्वे विरोध इति वाच्यम्। अदृश्यस्य दृश्यानुपादानत्वात् अन्यथा चक्षुरूष्मादिसन्ततौ कदाचिद् दृश्यत्वप्रसङ्गात्। न चाति-तप्ततैलादौ कथमदृश्यदहनसन्ततेः दृश्यदहनोत्पत्ति-रिति वाच्यम्। तत्र तदन्तःपातिभिः दृश्यदहनावयवैः स्थूल-

सा च त्रिधा भवेद्देहमिन्द्रियं विषयात्मना ॥३७॥

दहनोत्पत्तेरुपगमात्। न च अदृश्यद्व्यणुकेन कथं त्रसरेणोरुत्पत्तिः? इति वाच्यम्। यतो न वय दृश्यत्वमदृश्यत्वं वा कस्यचित् स्वभावादाचक्ष्महे, परन्तु महत्त्वोद्भूतरूपादि कारणसमुदायवशात् दृश्यत्वं, तथा च त्रसरेणोर्महत्त्वात् प्रत्यक्षं न तु द्व्यणुकादेस्तदभावात् न हि तन्मतेऽपीदं सम्भवति परमाणौ महत्त्वाभावात् इत्यं चावयविनिर्द्दिष्टे तेषामुत्पादविनाशयोः प्रत्यक्षत्वादनित्यत्वं तेषां चावयवावयवधाराया अनन्तत्वे मेरुसर्षपयोरपि साम्यप्रसङ्गः। अतः क्वचिद्विश्रामो वाच्यः यत्र च विश्रामस्तस्यानित्यत्वे त्वसमवेतभावकार्य्योत्पत्तिप्रसङ्गः स्यात् अतस्तस्य नित्यत्वं महत्परिमाणतारतम्यस्य गगनादौ विश्रान्तत्वमिवाणुपरिमाणतारतम्यस्यापि क्वचिद्विश्रान्तत्वमस्ति इति तस्य परमाणुत्वसिद्धिः न च त्रसरेणावेव विश्रामोऽस्त्विति वाच्यं त्रसरेणुः सावयवः चाक्षुषद्रव्यत्वात् घटवदित्यनुमानेन तदवयवसिद्धौ त्रसरेणोरवयवाः सावयवा महदवयवत्त्वात् कपालवदित्यनुमानेन तदवयवसिद्धेः न चेदमप्रयोजकम् अपकृष्टमहत्त्वं प्रति अनेकद्रव्यवत्त्वस्य प्रयोजकत्वात् न चैवं क्रमेण तदवयवधारापि सिध्येदिति वाच्यम् अनवस्थाभयेन तदसिद्धेः ॥ ३६ ॥

सा च त्रिधेति। सा कार्य्यरूपा पृथिवी त्रिविधा शरीरेन्द्रियविषयभेदादित्यर्थः ॥ ३७ ॥

योनिजादिर्भवेद्देह इन्द्रियं घ्राणलक्षणम्।

तत्र देहमुदाहरति—योनिजादीति। योनिजमयोनिजञ्चेत्यर्थः। योनिजमपि जरायुजमण्डजञ्च, जरायुजं मनुष्यादीनाम्, अण्डजं सर्पादीनाम्, अयोनिज स्वेदजोद्भिज्जादिकम्। स्वेदजाः कृमिदंशाद्याः उद्भिदस्तरुगुल्माद्याः। नारकिणां शरीरमपि अयोनिजम्। न च मानुषादिशरीराणां पार्थिवत्वे किं मानम्? इति वाच्यम्। गन्धादिमत्त्वस्यैव प्रमाणत्वात् न च क्लेदोष्मादेरुपलम्भादाप्यत्वादिकमपि स्यादिति वाच्यं, तथा सति जलत्वपृथिवीत्वादिना सङ्करप्रसङ्गात् न च तर्हि जलत्वादिकमेवास्तु न तु पार्थिवत्वमिति वाच्यं, क्लेदादीनां विनाशेऽपि शरीरत्वेन प्रत्यभिज्ञानात् गन्धाद्युपलब्धेश्च पृथिवीत्वसिद्धेः। एतेन पार्थिवादिशरीरे जलादीनां निमित्तत्वमात्रं बोध्यम्। शरीरत्वन्तु न जातिः पृथिवीत्वादिना साङ्कर्य्यात् किन्तु चेष्टाश्रयत्वं वृक्षादीनामपि चेष्टासत्त्वन्नाव्याप्तिः। न च वृक्षादीनां शरीरत्वे किं मानम्? इति वाच्यम्। आध्यात्मिकवायुसम्बन्धस्य प्रमाणत्वात् तत्रैव किं मानम्? इति चेत् भग्नक्षतसंरोहणादिना तदनुमानात्। यदि हस्तादौ शरीरव्यवहारो न भवति तदान्त्यावयवित्वेन विशेषणीयम्। न च यत्र शरीरे चेष्टा न जाता तत्राव्याप्तिरिति वाच्यम्, एतादृशे प्रमाणाभावात्। अथ वा चेष्टावदन्त्यावयविमात्रवृत्तिद्रव्यत्वव्याप्यव्याप्यजातिमत्त्वं तत्, मानुषत्वचैत्रत्वजातिमादाय लक्षणसमन्वयः। न च नृसिंहशरीरे कथं

विषयो द्व्यणुकादिश्च ब्रह्माण्डान्त उदाहृतः ॥३८॥
वर्णः शुक्लो रसस्पर्शौ जले मधुरशीतलौ ।

लक्षणसमन्वयः ? तत्र निरुक्तसंस्थानविशेषतया आकृति- भावात् जलीयतैजसशरीरवृत्तितया तैजसस्यापि शरीरत्वा- भावादिति वाच्यं, जातिभेदेन नृसिंहशरीरस्य नानाजाति- भिन्नत्वजात्या लक्षणसमन्वयात्। इन्द्रियमिति। घ्राणेन्द्रि- यं पार्थिवमित्यर्थः पार्थिवत्वं कथम् इति चेत्? इत्थं घ्राणे- न्द्रियं पार्थिवं रूपादिषु मध्ये गन्धस्यैव व्यञ्जकत्वात् कुङ्कुम- गन्धादिव्यञ्जकघृतवत् न च दृष्टान्ते स्वकीयरूपादि- व्यञ्जकत्वादसिद्धिरिति वाच्यं परकीयरूपाद्यव्यञ्जकत्वस्य तदर्थत्वात्। न च नवशरावगन्धव्यञ्जकजलेनानैकान्त्यमिति वाच्यं, तस्य शक्तुरसाभिव्यञ्जकत्वात्। यद्वा परकीयेति न देयं, वायूपनीतसुरभिभागस्य दृष्टान्तत्वसम्भवात्। न च घ्राणेन्द्रियसन्निकर्षस्य गन्धमात्रव्यञ्जकत्वात् तत्र व्यभि- चार इति वाच्यं, द्रव्यत्वे सति इति विशेषणात्। विषय इति। उपभोगसाधनं विषयः। सर्वमेव हि कार्यजातम् अदृष्टाधीनं यत् कार्यं यददृष्टाधीनं तत्तदुपभोगं साक्षात् परम्परया वा जनयत्येव। न हि बीजप्रयोजनाभ्यां विना कस्यचिदुत्पत्तिरस्ति, तेन द्व्यणुकादिब्रह्माण्डं सर्वमेव विषयो भवति शरीरेन्द्रिययोर्विषयत्वेऽपि प्रकारान्तरोप- न्यासः शिष्यबुद्धिवैशद्यार्थः ॥ ३८ ॥

जलं निरूपयति—वर्णः शुक्ल इति। स्नेहसमवायिकारण- तावच्छेदकतया जलत्वं जातिः सिध्यति। यद्यपि स्नेहत्वं

नित्यानित्यवृत्तितया न कार्य्यतावच्छेदकं, तथापि जन्यस्नेहत्वं तथा बोध्यम्। अथ परमाणोर्जलत्वं न स्यात् तत्र जन्यस्नेहाभावात् नित्यस्य स्वरूपयोग्यत्वे फलावश्यम्भावनियमादिति चेन्न, जन्यस्नेहजनकतावच्छेदकतया जन्यजातेः सिद्धौ तदवच्छिन्नजनकतावच्छेदकतया जलत्वजातिसिद्धेः। शुक्लरूपवत्त्वमेव दर्शयितुमुक्तं वर्णः शुक्ल इति। वस्तुस्थितिमात्रं न तु शुक्लरूपवत्त्वं लक्षणम् अथ वा नैमित्तिकद्रवत्ववद्वृत्ति--रूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वम् अभास्वरशुक्लेतररूपासमानाधिकरणरूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं वा तदर्थः। रसस्पर्शाविति। जलस्य मधुर एव रसः, शीत एव स्पर्शः। तिक्तावृत्तिमधुरवृत्ति द्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वम्। ननु शुक्लरूपवत्त्वमेवेति कुतः कालिन्दीजलादौ नीलोपलब्धेरिति चेन्न नीलजनकतावच्छेदिकायाः पृथिवीत्वजातेरभावात् जले नीलरूपासम्भवात् कालिन्दीजले नीलत्वप्रतीतिः आश्रयौपाधिकी अत एव वियति विक्षिप्ते धवलिमोपलब्धेः अथ जले माधुर्य्ये किं मानं? न हि प्रत्यक्षेण कोऽपि रसस्तत्रानुभूयते न च नारिकेलजलादौ माधुर्य्यमुपलभ्यत एवेति वाच्यं, तस्याश्रयौपाधिकत्वात् अन्यथा जम्बीररसादावम्लाद्युपलब्धेरम्लादिमत्त्वमपि स्यादिति चेन्न हरीतक्यादिभक्षणस्य जलरसव्यञ्जकत्वात् न च हरीतक्यामेव जलोष्मसंयोगाद्रसान्तरोत्पत्तिरिति वाच्यं कल्पनागौरवात् पृथिवीत्वस्याम्लादिजनकतावच्छेदकत्वाच्च जले नाम्लादिकं, जम्बीररसादौ तु आश्रयौपाधिकी तथा प्रतीतिः। एवं जन्यशीत-

स्नेहस्तत्र द्रवत्वन्तु सांसिद्धिकमुदाहृतम् ॥ ३८ ॥
नित्यतादि प्रथमवत् किन्तु देहमयोनिजम् ।
इन्द्रियं रसनं सिन्धुहिमादिर्विषयो मतः ॥ ३९ ॥

स्पर्शजनकतावच्छेदकतया जलत्वं जन्यजलत्वं वा बोध्यम् । चन्दनादौ तु शैत्योपलब्धिश्चन्दनान्तर्वर्तिशिशिरतर... तेजःसंयोगाज्जले औष्ण्यप्रतीतिरौपाधिकी स्फुटैव ... पाकासम्भवात् ॥ ३८ ॥

स्नेहस्त्वेति । घृतादावपि तदन्तर्वर्तिजलस्यैव स्नेहः, जलस्य स्नेहसमवायिकारणत्वात्, तेन जल एव स्नेह इति मन्तव्यम् । द्रवत्वमिति । सांसिद्धिकद्रवत्वजातिर्वि... प्रत्यक्षसिद्धस्तदवच्छिन्नजनकतावच्छेदकमपि तदेवेति ... तैलादावपि जलस्य द्रवत्वं स्नेहप्रकर्षेण च दहनानुकूल्यमिति वक्ष्यति ॥ ३९ ॥

प्रथमवदिति । पृथिव्या इवेत्यर्थः । तथाहि जलत्वं द्विवि... नित्यमनित्यञ्च परमाणुरूपं नित्यं, द्व्यणुकादिकं सर्वमनित्यम् अवयवसमवेतञ्च, अनित्यमपि त्रिविधं, शरीरेन्द्रियविषयभेदात् किन्तु पृथिवीतोयतो यो विशेषस्तमाह किन्त्विति । देहमयोनिजं अयोनिजमेवेत्यर्थः । ... जलीयं गन्धाद्यव्यञ्जकत्वे सति रसव्यञ्जकत्वात् सक्तुरसाभिव्यञ्जकोदकवत् रसनसन्निकर्षे व्यभिचारवारणाय द्रव्यत्वं देयम् । विषयं दर्शयति—सिन्धुहिमादिरिति । सिन्धुः समुद्रः हिमं तुषारः । आदिपदात् सरित्कासारकरकादिः सर्वो ग्राह्यः । न च हिमकरकयोः कठिनत्वात् पार्थिवत्व

स्पर्श उष्णस्तेजसस्तु स्याद्रूपं शुक्लभास्वरम्।
नैमित्तिकं द्रवत्वन्तु नित्यतादि च पूर्ववत्॥ ४१॥

मिति वाच्यम्, ऊष्मणा विलीनस्य तस्य जलत्वस्य प्रत्यक्षसिद्धत्वात् यद्द्रव्य यद्द्रव्यध्वंसजन्यम् इति व्याप्तेर्जलोपादानोपादेयत्वसिद्धेः। अदृष्टविशेषेण वा द्रवत्वनिरोधात् करकादीनां काठिन्यप्रत्ययस्य भ्रान्तत्वात्॥ ४०॥

तेजो निरूपयति। स्पर्श उष्ण इत्यादिना। उष्णत्वं स्पर्शनिष्ठो जातिविशेषः प्रत्यक्षसिद्धम् इत्यञ्च जन्योष्णस्पर्शसमवायिकारणतावच्छेदकं तेजस्त्वं जातिविशेषः, तस्य परमाणुवृत्तित्वं तु जलत्वस्येवानुसन्धेयम् न चोष्णस्पर्शवत्त्वं चन्द्रकिरणादावव्याप्तमिति वाच्यं, तत्रापि उष्णत्वस्य सत्त्वात्। किन्तु तदन्तःपातिजलस्पर्शेनाभिभवादग्रहः। एव रत्नकिरणादौ पार्थिवस्पर्शेनाभिभवाच्चक्षुरादौ चानुद्भूतत्वादग्रहः। रूपमित्यादि। वैश्वानरे मरकतकिरणादौ च पार्थिवरूपेणाभिभवात् शुक्लत्वाग्रहः। ननु तद्रूपाग्रहे धर्मिणोऽपि चाक्षुषत्व न स्यादिति चेन्न, अन्यदीयरूपेणापि धर्मिणोग्रहसम्भवात् शङ्खस्येव पित्तपीतिम्ना। वह्नेस्तु शुक्लं रूपं नाभिभूत किन्तु तदीयं शुक्लत्वमभिभूतमित्यन्ये। नैमित्तिकमिति सुवर्णादिरूपे तेजसि तत्सत्त्वात्। न च नैमित्तिकद्रवत्ववत्त्वं न लक्षण दहनादावव्याप्तेर्घृतादावतिव्याप्तेश्चेति वाच्य, पृथिव्यवृत्तिनैमित्तिकद्रवत्ववद्वृत्तिजातिमत्त्वस्य विवक्षितत्वात्। पूर्ववदिति। जलस्येव

स्नेहस्तत्र द्रवत्वन्तु सांसिद्धिकमुदाहृतम् ॥ ३८ ॥
नित्यतादि प्रथमवत् किन्तु देहमयोनिजम् ।
इन्द्रियं रसनं सिन्धुहिमादिर्विषयो मतः ॥ ३९ ॥

स्पर्शजनकतावच्छेदकं जलत्वं जलत्वं वा शैत्यम् । ...
चन्दनादौ तु शैत्योपलब्धिश्चन्दनान्तर्वर्त्तिशीततरस्य ...
तेजःसंयोगाज्जले औष्ण्यप्रतीतिरौपाधिकी स्फुटैव ...
पाकासम्भवात् ॥ ३८ ॥

स्नेहस्तत्रेति । घृतादावपि तदन्तर्वर्त्तिजलस्यैव स्नेहः ... जलस्य स्नेहसमवायिकारणत्वात्, तेन जल एव स्नेह ... मन्तव्यम् । द्रवत्वमिति । सांसिद्धिकद्रवत्वं जातिवि... प्रत्यक्षसिद्धस्तदवच्छिन्नजनकतावच्छेदकमपि तदेवेति भाव ... तैलादावपि जलस्य द्रवत्वं स्नेहप्रकर्षेण च ... ग्नामनुकू... मिति वक्ष्यति ॥ ३८ ॥

प्रथमवदिति । पृथिव्या इवेत्यर्थः । तथाहि जलत्वं द्विवि... नित्यमनित्यञ्च परमाणुरूपं नित्यं, द्व्यणुकादिकं ... मनित्यम् अवयवसमवेतञ्च, अनित्यमपि त्रिविधं, ... न्द्रियविषयभेदात् किन्तु पृथिवीतोयतो यो विशेषस्तमा... किन्त्विति । देहमयोनिजं अयोनिजमेवेत्यर्थः । ... जलीयं गन्धाद्यव्यञ्जकत्वे सति रसव्यञ्जकत्वात् ... भिव्यञ्जकोदकवत् रसनसन्निकर्षे व्यभिचारवारण... द्रव्यत्वं देयम् । विषयं दर्शयति—सिन्धुहिमादिरिति । सिन्धुः समुद्रः हिमं तुषारः । आदिपदात् ... करकादीनां सर्वो ग्राह्यः । न च हिमकरकयोः कठिनत्वात् पार्थिवत्व...

स्पर्श उष्णस्तेजसस्तु स्याद्रूपं शुक्लभास्वरम्।
नैमित्तिकं द्रवत्वन्तु नित्यतादि च पूर्ववत्॥ ४१॥

मिति वाच्यम्, ऊष्मणा विलीनस्य तस्य जलत्वस्य प्रत्यक्षसिद्धत्वात् यद्द्रव्यं यदद्रव्यध्वंसजन्यम् इति व्याप्तेर्जलोपादानोपादेयत्वसिद्धेः। अदृष्टविशेषेण वा द्रवत्वनिरोधात् करकादीनां काठिन्यप्रत्ययस्य भ्रान्तत्वात्॥ ४०॥

तेजो निरूपयति। स्पर्श उष्ण इत्यादिना। उष्णत्वं स्पर्शनिष्ठो जातिविशेषः प्रत्यक्षसिद्धम् इत्थञ्च जन्योष्णस्पर्शसमवायिकारणतावच्छेदकं तेजस्त्वं जातिविशेषः, तस्य परमाणुवृत्तित्वं तु जलत्वस्येवानुसन्धेयम् न चोष्णस्पर्शवत्त्वं चन्द्रकिरणादावव्याप्तमिति वाच्यं, तत्रापि उष्णत्वस्य सत्त्वात्। किन्तु तदन्तःपातिजलस्पर्शेनाभिभवादग्रहः। एवं रत्नकिरणादौ पार्थिवस्पर्शेनाभिभवाच्चक्षुरादौ चानुद्भूतत्वादग्रहः। रूपमित्यादि। वैश्वानरे मरकतकिरणादौ च पार्थिवरूपेणाभिभवात् शुक्लत्वाग्रहः। ननु तद्रूपाग्रहे धर्मिणोऽपि चाक्षुषत्वं न स्यादिति चेन्न, अन्यदीयरूपेणापि धर्मिणोग्रहसम्भवात् शङ्खस्येव पित्तपीतिम्ना। वह्नेस्तु शुक्लं रूपं नाभिभूतं किन्तु तदीयं शुक्लत्वमभिभूतमित्यन्ये। नैमित्तिकमिति सुवर्णादिरूपे तेजसि तत्सत्त्वात्। न च नैमित्तिकद्रवत्ववत्त्वं न लक्षणं दहनादावव्याप्तेर्घृतादावतिव्याप्तेश्चेति वाच्यं, पृथिव्यवृत्तिनैमित्तिकद्रवत्ववद्वृत्तिजातिमत्त्वस्य विवक्षितत्वात्। पूर्ववदिति। [illegible]

इन्द्रियं नयनं वह्निःस्वर्णादिर्विषयो मतः ॥ ४१ ॥

त्यर्थः। तथाहि तत् द्विविधं नित्यमनित्यञ्च, नित्यं परमाणु रूपं तदन्यदनित्यम् अवयवि। तच्च त्रिधा, शरीरेन्द्रियविषय भेदात्। शरीरमयोनिजमेवेत्यर्थः तच्च सूर्य्यलोकादौ प्रसिद्धम् ॥ ४१ ॥

अत्र यो विशेषस्तमाह—इन्द्रियमिति। चक्षुस्तैजसं परकीयस्पर्शाद्यव्यञ्जकत्वे सति परकीयरूपव्यञ्जकत्वात् प्रदीपवत् प्रदीपस्य स्वीयस्पर्शव्यञ्जकत्वादाद्यं परकीयेति घटादेः स्वीयरूपव्यञ्जकत्वात् व्यभिचारवारणाय द्वितीयं परकीयेति अथवा प्रभाया दृष्टान्तत्वसम्भवादाद्यं परकीयं न ... चक्षुःसन्निकर्षव्यभिचारवारणाय द्रव्यत्वं देयम्। व... दर्शयति—वह्नीति। ननु सुवर्णस्य तैजसत्वे किं मानं ... चेन्न, सुवर्णं तैजसम् असति प्रतिबन्धके अत्यन्तानलसंयोगेऽप्यनुच्छिन्नजन्यद्रवत्वात् यन्नैवं तन्नैवं तथा पृथिवी न चात्रप्रयोजकं पृथिवीद्रवत्वस्य जन्यजलद्रवत्वस्य चाग्निसंयोगनाश्यत्वात्। ननु पीतिमगुरुत्वाश्रयस्य ...वस्य तदानीं द्रुतत्वात्तेन व्यभिचार इति चेन्न, जलमध्यस्थमसी पङ्कोदकवत् तस्या द्रवत्वात्। अपरे तु पीतिमाश्रयस्य अत्यन्ताग्निसयोगेऽपि रूपापरावृत्तिदर्शनात् ...तिबन्ध विजातीयं द्रवत्वं कल्पाते, तथाहि अग्निसंयोगे पीतिमगुरुत्वाश्रयः विजातीयरूपप्रतिबन्धकाद्रवद्रव्यसंयुक्तः अत्यन्तमग्निसंयोगेऽपि पूर्वरूपविजातीयरूपानधिकरणपार्थिवत्वात् जलमध्यस्थपीतपटवत्, तस्य च पृथिवीजलभिन्नस्य तैजसत्वनियमात् ॥ ४१ ॥

अपाकजोऽनुष्णाशीतः स्पर्शस्तु पवने मतः ॥४२॥
तिर्य्यग्गमनवानेष ज्ञेयः स्पर्शादिलिङ्गकः ।
पूर्ववन्नित्यतायुक्तं देहव्यापि त्वगिन्द्रियम् ।
प्राणादिस्तु महावायुपर्य्यन्तो विषयो मतः ॥४३॥

वायुं निरूपयति—अपाकज इति । अनुष्णाशीतस्पर्शस्य पृथिव्यामपि सत्त्वादुक्तम् अपाकज इति । अपाकजस्पर्शस्य जलादावपि सत्त्वादुक्तम् अनुष्णाशीत इति । तेन वायवीयो विजातीयः स्पर्शो दर्शितः तज्जनकतावच्छेदकं वायुत्वमिति भावः । एष वायुः स्पर्शादिलिङ्गकः । वायुर्हि स्पर्शशब्दधृतिकम्पैरनुमीयते विजातीयस्पर्शेन, विजातीयशब्देन, तृणादीनां धृत्या, शाखादीनां कम्पेन च वायोरनुमानात् यथा च वायोर्न प्रत्यक्षं तथाग्रे वक्ष्यते । पूर्ववदिति । वायुर्द्विविधः नित्योऽनित्यश्च परमाणुरूपो नित्यस्तदन्योऽनित्यः सावयवश्च सोऽपि त्रिविधः शरीरेन्द्रियविषयभेदात् तत्र शरीरमयोनिजं पिशाचादीनां तत्तु जलीयतैजसवायवीयशरीराणां पार्थिवभागोपष्टम्भादुपभोगसाधनत्वं जलादीनां प्राधान्याज्जलत्वादिकमिति । एवं वा[illegible] इन्द्रियमाह—देहव्यापीति । सर्वशरीरव्यापकं स्पर्शग्राहकमिन्द्रियं त्वक् तच्च वायवीयं रूपादिषु मध्ये स्पर्शस्यैव व्यञ्जकत्वात् अङ्गसङ्गिसलिलशैत्यव्यञ्जकव्यजनवातवत् । विषयं दर्शयति—प्राणादिरिति । यद्यपि प्राणोऽपि वायुरनु-[illegible] तस्य शरीरे स्थितिः प्राणादिसंज्ञाभेदः तथापि [illegible] एव वहादिना ।

जन्यानां जनकः कालो जगतामाश्रयो मतः।
परापरत्वधीहेतुः क्षणादिः स्यादुपाधितः ॥ ४५ ॥

[illegible] ॥ ४४ ॥

कालं निरूपयति—जन्यानामिति। [illegible] तथाहि इदानीं घट इत्यादिप्रतीतिः [illegible]

[illegible] इति भावः। [illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible] कारणगुणपूर्व[illegible], [illegible]

[illegible] अभिघातावारणाय [illegible], [illegible] अभिघाताद[illegible]

[illegible]कारणगुणपूर्वकोति, जलपरमाणुरूपादौ अभिभव

वारणाय प्रत्यक्षेति। शब्दो न दिक्कालमनोगुण[illegible] विशेष

गुणत्वात्, नात्मविशेषगुणः बहिरिन्द्रियग्राह्यत्वात् [illegible]

[illegible] शब्दाधिकरणं नवमं द्रव्यं गगननामकं सिद्ध्यति

न च वाय्ववयवेषु सूक्ष्मशब्दक्रमेण वायौ कारणगुणपूर्व

शब्द उत्पाद्यतामिति वाच्यम्, यावद्द्रव्यभावित्वेन वा[illegible]

विशेषगुणत्वाभावात्, तत्र शरीरस्य विषयस्य चाभावा[illegible]

४४ ॥

[illegible] दर्शयति—इन्द्रियमिति। [illegible]

जन्यानां जनकः कालो जगतामाश्रयो मतः ।
परापरत्वधीहेतुः क्षणादिः स्यादुपाधितः ॥ ४५ ॥

सिद्धं, योऽयं तु दूरत्वभेदेन भिन्नं तदाकाशं स्यादत आह— एकः सन्नपीत्यादि। आकाश एक एव सन्नपि उपाधेः कर्णशष्कुल्यादिभेदाद्भिन्नं श्रोत्रात्मकं भवतीत्यर्थः ॥ ४४ ॥

कालं निरूपयति—जन्यानामिति। तत्र प्रमाणं दर्शयितुमाह—जन्यानामिति। तथाहि इदानीं घट इत्यादिप्रतीतिः सूर्यपरिस्पन्दादिकं यदा विषयीकरोति तदा सूर्यपरिस्पन्दादिना घटादेः सम्बन्धो वाच्यः स च संयोगादिर्न सम्भवतीति काल एव तत्सम्बन्धघटकः कल्प्यते, इत्थं च तस्याश्रयत्वमपि सिद्धम्। प्रमाणान्तरं दर्शयति—परापरत्वेति। परत्वापरत्वबुद्धेरसाधारणं निमित्तं [illegible] [illegible] इति भावः। [illegible]

[illegible]

[illegible]

दूरान्तिकादिधीहेतुरेका नित्या दिगुच्यते ।
उपाधिभेदादेकापि प्राच्यादिव्यपदेशभाक् ॥ ४६ ॥
आत्मेन्द्रियाद्यधिष्ठाता करणं हि सकर्तृकम् ॥४७॥

दिशं निरूपयति—दूरान्तिकेति। दूरत्वम् अन्तिकत्वञ्च दैशिकं परत्वमपरत्वं बोध्यम्। तद्बुद्धेरसाधारणं बीजं दिगेव। दैशिकपरत्वापरत्वयोरसमवायिकारणसंयोगाश्रयतया दिक् सिध्यतीति भावः। नन्वेकैव दिक् यदि, तदा प्राचीप्रतीच्यादिव्यवहारः कथमुपपद्यतामित्यत आह—उपाधीति। यत्पुरुषस्य उदयगिरिसन्निहिता या दिक् सा तस्य प्राची, उदयगिरिव्यवहिता च प्रतीची। एवं तत्पुरुषीयसुमेरुसन्निहिता दिगुदीची, तद्व्यवहिता त्ववाची। "सर्वेषामेव वर्षाणां मेरुरुत्तरतः स्थितः" इति नियमात् ॥ ४६ । ४६ ॥

आत्मानं निरूपयति—आत्मेन्द्रियेति। आत्मत्वजातिस्तु सुखदुःखादिसमवायिकारणतावच्छेदकतया सिध्यति। ईश्वरेऽपि सा जातिरस्त्येव। अदृष्टादिरूपकारणाभावाच्च न सुखदुःखाद्युत्पत्तिः नित्यस्य स्वरूपयोग्यस्य फलावश्यम्भाव इति नियमस्याप्रयोजकत्वात्। परे त्वीश्वरे सा जातिर्नास्त्येव प्रमाणाभावात्। न च दशमद्रव्यत्वापत्तिः ज्ञानवत्त्वेन विभजनादिति वदन्ति—इन्द्रियादीति। इन्द्रियाणां शरीरस्य च परम्परया चैतन्यसम्पादकः। यद्यप्यात्मनि "अहं जाने अहं सुखीत्यादि" प्रत्यक्षविषयत्वमस्त्येव तथापि विप्रतिपन्नं प्रति प्रथमत एव शरीरादिभिन्नस्तत्प्रतीतिगोचर इति

शरीरस्य न चैतन्यं मृतेषु व्यभिचारतः।
तथात्वञ्चेदिन्द्रियाणामुपघाते कथं स्मृतिः? ॥४८॥

प्रतिपादयितुं न शक्यत इत्यतः प्रमाणं दर्शयति—करणमिति। कुठारादीनां छिदादिकरणानां कर्त्तारमन्तरेण फलानुपधानं दृष्टम्, एवं चक्षुरादीनां ज्ञानकरणानां फलोपधानमपि कर्त्तारमन्तरेण नोपपद्यत इत्यतिरिक्तः कर्त्ता कल्प्यते। ४७।

ननु शरीरस्यैव कर्त्तृत्वमस्तु अत आह—शरीरस्येति। ननु चैतन्यं ज्ञानादिकमेव तदात्मना त्वन्मत इव मृतशरीराणामपि तदभावे का क्षतिः, प्राणाभावेन ज्ञानाभावस्य सिद्धेरिति चेन्न। शरीरस्य चैतन्ये बाल्ये विलोकितस्य स्थाविरे स्मरणानुपपत्तेः शरीराणामवयवोपचयापचयैरुत्पादविनाशशालित्वात्, न च पूर्वशरीरोत्पन्नसंस्कारेण द्वितीयशरीरे संस्कार उत्पद्यत इति वाच्यम्, अनन्तसंस्कारकल्पने गौरवात्। एवं शरीरस्य चैतन्ये बालकस्य स्तनपानादौ प्रवृत्तिर्न स्यात्, इष्टसाधनताज्ञानस्य तद्धेतुत्वात् तदानीमिष्टसाधनताज्ञापकाभावात्, मन्मते जन्मान्तरानुभूतेष्टसाधनत्वस्य तदानीं स्मरणादेव प्रवृत्तिः। न च जन्मान्तरानुभूतमन्यदपि स्मर्य्यतामिति वाच्यम्, उद्बोधकाभावात्। अत्र तु जीवनादृष्टमेवोद्बोधकं कल्प्यते, इत्थञ्च संसारस्यानादितया आत्मनोऽपि अनादित्वसिद्धौ अनादिभावस्य नाशासम्भवात् नित्यत्वं सिध्यतीति बोध्यम्। ननु चक्षुरादीनां ज्ञानादौ करणत्वं कर्तृत्वं चास्तु इति

मनोऽपि न तथा ज्ञानाद्यनध्यक्षं तदा भवेत् ॥४९

साक्षात्काराभावादत आह—तथात्वमिति। तथात्वं चेतनत्वमित्यर्थः। इष्यते नाशे सति चक्षुरादीनामिति, कथं स्मृतिः? एवं चक्षुषा साक्षात्कृतानां चक्षुरभावे स्मरणं न स्यात्, अनुभवितुरभावात् अन्यदृष्टस्य अन्येन स्मरणासम्भवात् अनुभवस्मरणयोः सामानाधिकरण्येन कार्यकारणभावादिति भावः ॥ ४८ ॥

ननु चक्षुरादीनां चैतन्यं मास्तु मनसस्तु नित्यस्य चेतनत्वं स्यात् अत आह—मनोऽपीति। न तथा न चेतनं ज्ञानादीति मनसोऽणुत्वात् प्रत्यक्षे च महत्त्वस्य हेतुत्वान्मनसि ज्ञानसुखादिसत्त्वे तत्प्रत्यक्षानुपपत्तेरित्यर्थः यथा मनसोऽणुत्वं तथा वक्ष्यते।

नन्वस्तु विज्ञानमेव आत्मा तस्य स्वतः प्रकाशरूपत्वात् चेतनत्वम्। ज्ञानसुखादिकन्तु तस्यैवाकारविशेषः, तस्यापि भावत्वादेव क्षणिकत्वं पूर्वपूर्वविज्ञानस्योत्तरविज्ञाने हेतुत्वात् सुषुप्तावप्यालयविज्ञानधारा निराबाधैव मृगमदवासनाया वसन इव पूर्वपूर्वविज्ञानजनितसंस्काराणामुत्तरोत्तरविज्ञाने सङ्क्रान्तत्वान्नानुपपत्तिः स्मरणादेरिति चेन्न, तस्य जगद्विषयत्वे सार्वज्ञ्यापत्तेः यत्किञ्चिद्विषयत्वे विनिगमनाभावात्। सुषुप्तावपि विषयावभासप्रसङ्गः। तदानीं निराकारा चित्सन्ततिरनुवर्त्तत इति चेन्न, तस्य स्वप्रकाशत्वे प्रमाणाभावात्, अन्यथा घटादीनामपि ज्ञानत्वापत्तिः न [illegible] विज्ञानव्यतिरिक्तवस्तुनोऽभावादिति वाच्यं घटादेरनुभूयमानस्यापलपितुमशक्यत्वात्। आकारविशेष

एवायं विज्ञानस्येति चेत् किमयमाकारोऽतिरिच्यते विज्ञानात्तर्हि समायातं विज्ञानव्यतिरिक्तेन नातिरिच्यते चेत्तर्हि समूहालम्बने नीलाकारोऽपि पीताकारः स्यात् स्वरूपतो विज्ञानस्याविशेषात्. अपोहरूपो नीलत्वादिर्विज्ञानधर्म इति चेन्न. नीलत्वादीनां विरुद्धानामेकस्मिन्नसमावेशात् इतरथा विरोधस्यैव दुरुपपन्नत्वात्. न च वासनासङ्क्रमः सम्भवति मातृपुत्रयोरपि वासनासङ्क्रमप्रसङ्गात् न चोपादानोपादेयभावो नियामक इति वाच्यं वासनायाः सङ्क्रमासम्भवात् उत्तरस्मिन्नुत्पत्तिरेव सङ्क्रम इति चेन्न तदुत्पादकाभावात् उत्तरविज्ञानस्यैव उत्पादकत्वे तदानन्त्यप्रसङ्गः क्षणिकविज्ञानेऽतिशयविशेष कल्प्यत इति चेन्न. मानाभावात् कल्पनागौरवाच्च. एतेन क्षणिकशरीरेष्वेव चैतन्यमपि प्रत्युक्तं गौरवादतिशये मानाभावाच्च। बीजादावपि सहकारिसमवधानादेवोपपत्तेः कुर्वद्रूपत्वाकल्पनाच्च। ननु तर्हि क्षणिकविज्ञाने गौरवान्नित्यविज्ञानमेवात्मा "अविनाशी वा अरे अयमात्मा सत्यं ज्ञानमनन्तं ब्रह्म" इत्यादि श्रुतेरिति चेन्न. तस्य विषयत्वासम्भवस्य दर्शितत्वात् निर्विषयस्य ज्ञानत्वे मानाभावात् सविषयत्वस्याप्यननुभवात् अतो ज्ञानभिन्नो नित्य आत्मेति सिद्धम् सत्यं ज्ञानमिति तत्परं जीवेषु नोपपद्यते ज्ञानाज्ञानसुखित्वदुःखित्वादिभिस्तेषां भेदसिद्धौ सुतरामात्मनोऽन्यथा व्यवस्थानुपपत्ते वेदोऽपीश्वराभेदबोधको चेत् सोऽपि तद्भेदेन तद्गतत्व प्रतिपादयन् श्रौति अभेदमाहते च तत्त्वमिति वदति। अन्यथा सर्व एव ज्ञानी सर्वदा

इति श्रूयते मोक्षदशायामज्ञाननिवृत्तावभेदो जायत इत्यपि न, भेदस्य नित्यत्वे नाशायोगात् भेदनाशेऽपि व्यक्तिद्वयं स्यास्त्येव। न च द्वित्वमपि नश्यतीति वाच्यं, तत्र निर्धर्मके ब्रह्मणि सत्यत्वाभावेऽपि सत्यस्वरूपं तदितिवत् द्वित्वाभावेऽपि द्वयात्मकौ ताविति सुवचत्वात् मिथ्यात्वाभावोऽधिकरणात्मकस्तत्र सत्यत्वमिति चेत् एकत्वाभावो व्यक्तिद्वयात्मको द्वित्वमप्युच्यतां प्रत्येकमेकत्वेऽपि पृथिवीजलयोर्न गन्ध इति वदुभय नैकमित्यस्य, सर्वजनसिद्धत्वात् योऽपि तदानीमभेदप्रतिपादक आगमः सोऽपि निर्दुःखादिना साम्यं प्रतिपादयति सम्पदाधिक्ये, पुरोहितोऽयं राजा संवृत्त, इतिवत् अतएव "निरञ्जन. परमं साम्यमुपैतीति" श्रूयते। ईश्वरो न ज्ञानसुखात्मा, किन्तु ज्ञानाद्याश्रयः "नित्यं विज्ञानमानन्दं ब्रह्म" इत्यादौ विज्ञानपदेन ज्ञानाश्रय एवोक्तः, "यः सर्वज्ञः" इत्यनुरोधात् आनन्दम् इत्यस्यापि आनन्दवदित्यर्थः। अर्श आदित्वान्मत्वर्थीयाच्प्रत्ययात्, अन्यथा पुलिङ्गत्वापत्तेः आनन्दोऽपि दुःखभावे उपचर्य्यते भाराद्यपगमे सुखी संवृत्तोऽहमितिवत, दुःखाभावेन सुखित्वप्रत्ययात् अस्तु वा तस्मिन्नानन्दो न त्वसौ आनन्दमित्यत्र मत्वर्थीयप्रत्ययविरोधात्। "आनन्दं ब्रह्मणो विद्वान्न बिभेति कदाचन" इत्यत्र भेदस्य स्पष्टत्वाच्चेति सङ्क्षेपः। एतेन प्रकृतिः कर्त्री पुरुषः पुष्करपलाशवन्निर्लेपः, किन्तु चेतनः कार्य्यकारणयोरभेदात् कार्य्यनाशे कार्य्यरूपतया नाशः स्यादित्यकारणत्वं तस्य बुद्धिगतचैतन्याभिमानान्यथानु-

धर्माधर्माश्रयोऽध्यक्षो विशेषगुणयोगतः ॥ ४९ ॥

सैव महत्तत्त्वमन्तःकरणमप्युच्यते। तत्सत्त्वासत्त्वाभ्यां पुरुषस्य संसारापवर्गौ। तस्या एवेन्द्रियप्रणालिकया परिणतिर्ज्ञानरूपा घटादिना सम्बन्धः। पुरुषे कर्त्तृत्वाभिमानो बुद्धौ चैतन्याभिमानश्च। भेदाग्रहात् ममेदं कर्त्तव्यमिति मदंशः पुरुषोपरागो बुद्धेः स्वच्छतया चेतनप्रतिबिम्बादतात्त्विको दर्पणस्येव मुखोपरागः। इदमिति विषयोपराग इन्द्रियप्रणालिकया परिणतिभेदस्तात्त्विको निश्वासाभिहतदर्पणस्येव मलिनिमा। कर्त्तव्यमिति व्यापारांशः। तेनांशत्रयवती बुद्धिस्तत्परिणामेन ज्ञानेन पुरुषस्यातात्त्विकः सम्बन्धो दर्पणमलिनिम्नेव मुखस्योपलब्धिरुच्यते। ज्ञानादिवत् सुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मा अपि बुद्धेरेव। कृतिसामानाधिकरण्येन प्रतीतेः।

न च बुद्धिश्चेतनापरिणामित्वादिति सांख्यमतमपास्तम्। कृत्यदृष्टभोगानामिव चैतन्यस्यापि सामानाधिकरण्यप्रतीतेस्तद्भिन्ने मानाभावाच्चेतनोऽहं करोमीति प्रतीतेः बुद्धेः परिणामित्वाच्चैतन्यांशे भ्रम इति चेत् कृत्यंशे किं नेष्यते। अन्यथा बुद्धेर्नित्यत्वे मोक्षाभावोऽनित्यत्वे तत्पूर्वमसंसारापत्तिः। अचेतनायाः प्रकृतेः कार्य्यत्वात् बुद्धेरचैतन्यं कार्य्यकारणयोस्तादात्म्यादिति चेन्न। असिद्धेः कर्त्तृजन्यत्वे मानाभावात्। वीतरागजन्मादर्शनादनादित्वम्। अनादेर्नाशासम्भवान्नित्यत्वम्। तत् किं प्रकृत्यादिकल्पनेन। न च

प्रवृत्त्याद्यनुमेयोऽयं रथगत्येव सारथिः।

अहङ्कारस्याश्रयोऽयं मनोमात्रस्य गोचरः॥

"प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः।

अहङ्कारविमूढात्मा कर्त्ताहमिति मन्यते॥"

इत्यनेन विरोध इति वाच्यम्। प्रकृतेरदृष्टस्य। गुणैः

दृष्टजन्यैर्गुणैः इच्छादिभिः। कर्त्ताहं कर्त्ताहमेव। २

तदर्थत्वात् "तत्रैवं सति कर्त्तारमात्मानं केवलन्तु

इत्यादि वदता भगवता प्रकटीकृतोऽयमनुपा।१४।८।"

इति संक्षेपः।

धर्माधर्माश्रय इति। आत्मेत्यनुषज्यते। शरीरस्य तदा

श्रयत्वे देहान्तरकृतकर्मणां देहान्तरेण भोगानुपपत्ते

विशेषगुणयोगत इति। योग्यविशेषगुणसम्बन्धे न।

प्रत्यक्षं भवति न त्वन्यथा अहं जाने अहङ्करोमि इत्या

प्रतीतेः॥ ४८॥

प्रवृत्तीति। अयमात्मा परदेहादौ प्रवृत्त्यादिनाऽनु

यते। प्रवृत्तिरत्र चेष्टा। ज्ञानेच्छाप्रयत्नादीना देहे अ

स्योक्तप्रायत्वात् चेष्टायाश्च यत्नसाध्यत्वात्। चेष्टया

वानात्माप्यनुमीयत इति भावः। तत्र दृष्टान्तमाह—रथे

यद्यपि रथकर्मचेष्टा न भवति तथापि तेन कर्मणा स

थिर्यथाऽनुमीयते तथा चेष्टात्मकेन कर्मणा परमात्मापि

भावः।

अहङ्कारस्येति। अहङ्कारोऽहमिति प्रत्ययः तस्याश्र

विषय. आत्मा न शरीरादिरिति। मन इति मनोभि

प्रवृत्त्याद्यनुमेयोऽयं रथगत्येव सारथिः ।

अहङ्कारस्याश्रयोऽयं मनोमात्रस्य गोचरः ॥ ५०॥

"प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः ।

अहङ्कारविमूढात्मा कर्त्ताहमिति मन्यते ॥"

इत्यनेन विरोध इति वाच्यम् । प्रकृतेरदृष्टस्य । गुणैः दृष्टजन्यैर्गुणैः इच्छादिभिः । कर्त्ताहं कर्त्ताहमेव । इत्थं तदर्थत्वात् "तत्रैवं सति कर्त्तारमात्मानं केवलन्तु यः" इत्यादि वदता भगवता प्रकटीकृतोऽयमुपरिष्टादाशय इति संक्षेप ।

धर्माधर्माश्रय इति । आत्मेत्यनुषज्यते । शरीरस्य तदाश्रयत्वे देहान्तरकृतकर्मणा देहान्तरेण भोगानुपपत्तेः । विशेषगुणयोगत इति । योग्यविशेषगुणसम्बन्धे नात्मा प्रत्यक्षं भवति न त्वन्यथा अहं जानि अहङ्करोमि इत्यादि प्रतीतेः ॥ ४८ ॥

प्रवृत्तीति । अयमात्मा परदेहादौ प्रवृत्त्यादिनाऽनुमीयते । प्रवृत्तिरत्र चेष्टा । ज्ञानेच्छाप्रयत्नादीनां देहे अभावस्योक्तप्रायत्वात् चेष्टायाश्च यत्नसाध्यत्वात् । चेष्टया प्रयत्नवानात्माप्यनुमीयत इति भावः । तत्र दृष्टान्तमाह—रथेति । यद्यपि रथकर्मचेष्टा न भवति तथापि तेन कर्मणा सारथिर्यथाऽनुमीयते तथा चेष्टात्मकेन कर्मणा परमात्मापीति भावः ।

अहङ्कारस्येति । अहङ्कारोऽहमिति प्रत्ययः तस्याश्रयो विषयः आत्मा न शरीरादिरिति । मन इति मनोभिन्ने

उद्भूतरूपं नयनस्य गोचरो
द्रव्याणि तद्वन्ति पृथक्त्वसंख्ये ।
विभागसंयोगपरापरत्व-
स्नेहद्रवत्वं परिमाणयुक्तम् ॥ ५४ ॥
क्रियां जातिं योग्यवृत्तिं समवायञ्च तादृशम् ।
गृह्णाति चक्षुः सम्बन्धादालोकोद्भूतरूपयोः ॥ ५५ ॥
उद्भूतस्पर्शवद्द्रव्यं गोचरः सोऽपि च त्वचः ।

उद्भूतरूपमिति [illegible] ॥ ५४ ॥

[illegible]

[illegible]

घ्राणजादिप्रभेदेन प्रत्यक्षं षड्विधं मतम् ॥ ५२ ॥
घ्राणस्य गोचरो गन्धो गन्धत्वादिरपि स्मृतः ।
तथा रसो रसज्ञायास्तथा शब्दोऽपि च श्रुतेः ॥ ५३ ॥

तज्ज्ञानं तदिन्द्रियमिति । न च [illegible] ज्ञानमित्यादिव्याप्तिरिति वाच्यं [illegible] त्वजातिमत्त्वस्य विवक्षितत्वात् । अथवा [illegible] त्वं ज्ञानत्वमिति । एवं [illegible] मिति । [illegible] ज्ञान [illegible] । [illegible] चिदनुमितिव्यक्तिमादाय तद्वृत्तिजातिमत्त्वे सति यत्कि-ञ्चित् प्रत्यक्षव्यक्तिमादाय तद्वृत्तिजातिमत्त्वम् अनुमितित्वम् । एवं यत्किञ्चित् प्रत्यक्षादिमादाय तद्वृत्तिजातिमत्त्वे सति यत्किञ्चिदनुमितिव्यक्तिमादाय तद्वृत्तिजातिमत्त्वं प्रत्यक्षत्वादिकं वाच्यमिति । घ्राणजादीति घ्राणजं रासनं चाक्षुषं स्पार्शनं श्रौत्रं मानसमिति षड्विधं प्रत्यक्षम् । न चेश्वरप्रत्यक्षस्याविभजनात् न्यूनत्वम् । जन्यप्रत्यक्षस्यैव निरूपणीयत्वात् उक्तसूत्रानुसारात् ॥ ५२ ॥

घ्राणस्येति । गोचर इति ग्राह्य इत्यर्थः । गन्धत्वादिरिति आदिपदात् सुरभित्वासुरभित्वपरिग्रहः । गन्धस्य प्रत्यक्षत्वात्तद्वृत्तिजातिरपि प्रत्यक्षा । गन्धाश्रयग्रहणे तु घ्राणस्य न सामर्थ्यमिति बोध्यम् । तथा रस इति रसत्वादिसहित इत्यर्थः । गन्धो रसश्च उद्भूतो बोध्यः । तथा शब्द-इति शब्दत्वादिसहित. ॥ ५३ ॥

उद्भूतरूपं नयनस्य गोचरो
द्रव्याणि तद्वन्ति पृथक्त्वसंख्ये ।
विभागसंयोगपरापरत्व-
स्नेहद्रवत्वं परिमाणयुक्तम् ॥ ५४ ॥

क्रियां जातिं योग्यवृत्तिं समवायञ्च तादृशम् ।
गृह्णाति चक्षुः संयोगादालोकोद्भूतरूपयोः ॥५५॥
उद्भूतस्पर्शवद्द्रव्यं गोचरः सोऽपि च त्वचः ।

उद्भूतरूपमिति । घ्राणोष्मादावनुद्भूतरूपमिति न चाक्षुष प्रत्यक्षम् । तद्वन्ति उद्भूतरूपवन्ति ॥ ५४ ॥

योग्येति । पृथक्त्वादिकमपि योग्यवृत्तितया ग्राह्यम् । तादृशं योग्यवृत्तिमित्यर्थः । चक्षुर्योग्यत्वमेव कथ तदाह गृह्णातीति आलोकसंयोग उद्भूतरूपञ्च चाक्षुषप्रत्यक्षं प्रति कारणम् । तत्र द्रव्यचाक्षुषं प्रति तयोः समवायसम्बन्धेन कारणम् । द्रव्यसमवेतप्रत्यक्षं प्रति स्वाश्रयसमवायसम्बन्धेन द्रव्यसमवेतसमवेतस्य रूपत्वादेः प्रत्यक्षे स्वाश्रयसमवेतसमवायसम्बन्धेनेति ॥ ५५ ॥

उद्भूतस्पर्शवद्द्रव्य गोचरस्त्वचो गोचर । सोऽपि उद्भूतस्पर्शोऽपि स्पर्शत्वादिसहितः । रूपान्यदिति रूपभिन्नं रूपत्वादिभिन्नञ्च चक्षुषो यत् योग्यं तत् त्वगिन्द्रियस्यापि ग्राह्यम् । तथा च पृथक्त्वादिसंख्यादयो ये चक्षुर्ग्राह्या गुणा उक्ता एव क्रिया एव जातयो योग्यवृत्तयश्च ते त्वचो ग्राह्या इति । अत्रापि त्वगिन्द्रियजन्येऽपि रूपं द्रव्यप्रत्यक्षे कारणं

रूपान्यच्चक्षुषोऽयोग्यं रूपमत्रापि कारणम् ।
द्रव्याध्यक्षे त्वचो योगो मनसा ज्ञानकारणम् ।

तथा च बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षे रूपं कारणमिति प्राचीनाः। नवीनास्तु बहिर्द्रव्यप्रत्यक्षे रूपं न कारणं किन्तु चाक्षुषप्रत्यक्षे रूपं स्पार्शनप्रत्यक्षे स्पर्शः कारणम् अन्वयव्यतिरेकात् । बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षमात्रे किं कारणमिति चेत् न किञ्चिदात्मवृत्तिजात्यवच्छिन्नविशेषगुणवत्त्वं वा प्रयोजकमस्तु। रूपस्य कारणत्वे गौरवमिति चेद्‌व वायोस्त्वगिन्द्रियेणाग्रहणप्रसङ्गादिष्टापत्तिरिति चेत् स्पर्श एव लाघवात् कारणमस्तु प्रभाया अप्रत्यक्षत्वे त्विष्टापत्तिरित्येव किं न स्यात्। तस्मात् प्रभां पश्यामीतिवत् वायुं स्पृशामीति प्रत्ययस्य सत्त्वात् वायोरपि प्रत्यक्षं भवत्येव। बहिर्द्रव्यप्रत्यक्षमात्रे तु न रूपस्य न वा स्पर्शस्य हेतुत्वं वायुप्रभयोरैक्यं गृह्यत एव क्वचित् द्वित्वादिकमपि क्वचित् संख्यापरिमाणाद्यग्रहो दोषादित्याहुः ॥ ५६ ॥

त्वचो योगो मनसा ज्ञानकारणमिति त्वङ्मनःसंयोगो ज्ञानसामान्ये कारणमित्यर्थः किं तत्र प्रमाणं सुषुप्तिकाले त्वचं त्यक्त्वा पुरीतति वर्त्तमानेन मनसा ज्ञानजननमिति। ननु सुषुप्तिकाले किं ज्ञानं भविष्यति अनुभवरूपं स्मरणरूपं वा। नाद्यः अनुभवसामग्र्यभावात्। तथाहि चाक्षुषादिप्रत्यक्षे चक्षुरादिना सह मनःसंयोगस्य हेतुत्वात् तदभावादेव न चाक्षुषादिप्रत्यक्षं ज्ञानादेरभावादेव न मानसप्रत्यक्षं ज्ञानाद्यभावे च नात्मनोऽपि न प्रत्यक्षमिति। व्याप्तिज्ञानाभावात्

मनोग्राह्यं सुखं दुःखमिच्छा द्वेषो मतिः कृतिः॥५७
ज्ञानं यन्निर्विकल्पाख्यं तदतीन्द्रियमिष्यते ।

नानुमिति सादृश्यज्ञानाभावात् नोपमितिः पदज्ञानाभावात् न शाब्दबोधः इत्यनुभवसामग्र्यभावात् नानुभव । उद्बोधकाभावाच्च न स्मरणम् । नैव सुषुप्तिप्राक्कालोत्पन्नेच्छादिव्यक्तेस्तत्तत्सम्बन्धेनात्मनश्च प्रत्यक्षप्रसङ्गात् तदतीन्द्रियत्वे मानाभावात् सुषुप्तिप्राक्काले निर्विकल्पकमेव जायत इत्यत्रापि प्रमाणाभावात् । अथ ज्ञानमात्रे त्वङ्मनःसंयोगस्य यदि कारणत्वं तदा रासनचाक्षुषादिप्रत्यक्षकाले स्पार्शनप्रत्यक्षं स्यात् । विषयत्वक्संयोगस्य त्वङ्मनःसंयोगस्य च सत्त्वात् परस्परप्रतिबन्धादेकमपि वा न स्यादिति । अत्र केचित् पूर्वोक्तयुक्त्या त्वङ्मनोयोगस्य हेतुत्वे सिद्धे चाक्षुषादिसामग्र्या स्पार्शनादिप्रतिबन्धकत्वमनुभवानुरोधात् कल्प्यत इति । अन्ये तु सुषुप्त्यनुरोधात् चर्ममनःसंयोगस्य ज्ञानहेतुत्वं वाच्यं चाक्षुषादिप्रत्यक्षकाले त्वङ्मनःसंयोगाभावान्न स्पार्शनप्रत्यक्षमिति वदन्ति । मनोग्राह्यं सुखं दुःखमिच्छा द्वेषो मतिः कृतिरिति मनोजन्यप्रत्यक्षविषय इत्यर्थः । मतिर्ज्ञानम् । कृतिः प्रयत्नः । एवं सुखत्वादिकमपि मनोग्राह्यम् । एवमात्मापि मनोग्राह्यः किन्तु मनोमात्रस्य गोचर इत्यनेन पूर्वमुक्तत्वात् अत्र नोक्तः ॥ ५७ ॥

ज्ञानं यन्निर्विकल्पाख्यं तदतीन्द्रियमिष्यत इति । चक्षुःसंयोगाद्यनन्तरं घट इत्याकारं घटत्वादिविशिष्ट

महत्त्वं षड्विधे हेतुरिन्द्रियं करणं मतम् ॥ ५८॥

ज्ञानं न सम्भवति पूर्वं विशेषणस्य घटत्वादिज्ञानाभावात्। विशिष्टबुद्धौ विशेषणज्ञानस्य कारणत्वात् तथा च प्रथमतो घटघटत्वयोर्वैशिष्ट्यानवगाहि ज्ञानं जायते तदेव निर्विकल्पकात्मकं तच्च न प्रत्यक्षं तथा हि विषयानवगाहिज्ञानस्य प्रत्यक्षं न भवति घटमहं जानामीति प्रत्यक्षात् तत्रात्मनि ज्ञानं प्रकारीभूय भासते। ज्ञाने घटस्तत्र घटत्वं यः प्रकार स एव विशेषणमित्युच्यते। विशेषणे यद्विशेषणं तद्विशेषणतावच्छेदकमित्युच्यते। विशेषणतावच्छेदकप्रकारकं ज्ञान विशिष्टवैशिष्ट्यज्ञानकारणम्। निर्विकल्पके च घटत्वादिक न प्रकारस्तेन घटत्वादिविशिष्टघटादिवैशिष्ट्यभान न सम्भवति। घटत्वाद्यप्रकारकं घटादिविशिष्टज्ञानं न सम्भवति जात्यतिरिक्तपदार्थज्ञानस्य किञ्चिद्धर्मप्रकारकत्वनियमात्। महत्त्वम्। षड्विधे हेतुरिति द्रव्यप्रत्यक्षे महत्त्व समवायसम्बन्धेन कारणं द्रव्यसमवेताना जातिगुणकर्म्मणा प्रत्यक्षे स्वाश्रयसमवायसम्बन्धेन कारणम्। द्रव्यसमवेताना गुणत्वकर्म्मत्वरूपत्वादीना प्रत्यक्षे स्वाश्रयसमवेतसमवायसम्बन्धेन कारणमिति। इन्द्रियमिति अत्रापि षड्विध इति अनुषज्यते। इन्द्रियत्वन्तु न जातिः। पृथिवीत्वादिना साङ्कर्य्यप्रसङ्गात्।

न्तु शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकान. योगाश्रयत्वम् आत्मादिवारणाय सत्यन्तम्। उद्भूतविशेषगुणस्य शब्दस्य श्रोत्रे सत्त्वात् शब्देतरेति विशे-

विषयेन्द्रियसम्बन्धो व्यापारः सोऽपि षड्विधः।
द्रव्यग्रहस्तु संयोगात् संयुक्तसमवायतः॥ ५९॥
द्रव्येषु समवेतानां तथा तत्समवायतः।
तत्रापि समवेतानां शब्दस्य समवायतः॥ ६०॥

षड्गुणस्य रूपादेश्चक्षुरपि सत्त्वात् उद्भूतेति उद्भूतत्वं न जातिः शुक्लत्वादिना सङ्करात्। न च शुक्लत्वादिव्याप्यं नानैवोद्भूतत्वमिति वाच्यम् उद्भूतरूपत्वादिना चाक्षुषादौ जनकतानुपपत्तेः। किन्तु शुक्लत्वादिव्याप्यमनुद्भूतत्वं नाना तदभावकूटश्चोद्भूतत्वम्। तच्च संयोगादावपि। तथा च प्रत्यक्षेतरोद्भूतगुणः संयोगादिश्चक्षुरादेरस्तीति विशेषेति वाय्वादिवारणाय विशेषणम्। इन्द्रियावयवविषयसंयोगस्यापि प्रायः सति प्रत्यक्षजनकत्वात् इन्द्रियावयववारणाय कालादौ रूपाभावप्रत्यक्षे सन्निकर्षघटकतया कारणीभूतचक्षुःसंयोगाद्याश्रयस्य वा कालादेर्वारणाय सत्यन्तं ज्ञानकारणमित्यपि तद्वारणाय। करणमिति असाधारणं कारणं करणम्। असाधारणत्वं व्यापारवत्त्वम्। ५८।

विषयेन्द्रियसम्बन्धो व्यापारः सोऽपि षड्विध इति व्यापारः सन्निकर्षः षड्विधं सन्निकर्षमुदाहरणद्वारा दर्शयति द्रव्यग्रह इति। द्रव्यप्रत्यक्षमिन्द्रियसंयोगजन्यं [illegible] [illegible] [illegible]

महत्त्वं षड्विधे हेतुरिन्द्रियं करणं मतम् ॥ ५८॥

ज्ञाने न सम्भवति पूर्वं विशेषणस्य घटत्वादिज्ञानाभावात्। विशिष्टबुद्धौ विशेषणज्ञानस्य कारणत्वात् तथा च प्रथमतो घटघटत्वयोर्वैशिष्ट्यानवगाहि ज्ञानं जायते तदेव निर्विकल्पकात्मकं तच्च न प्रत्यक्षं तथा हि विषयानवगाहिज्ञानस्य प्रत्यक्षं न भवति घटमहं जानामीति प्रत्यक्षात् तत्रात्मनि ज्ञानं प्रकारीभूय भासते। ज्ञाने घटस्तत्र घटत्वं यः प्रकारः स एव विशेषणमित्युच्यते। विशेषणे यद्विशेषणं तद्विशेषणतावच्छेदकमित्युच्यते। विशेषणतावच्छेदकप्रकारकं ज्ञानं विशिष्टवैशिष्ट्यज्ञानकारणम्। निर्विकल्पके च घटत्वादिकं न प्रकारस्तेन घटत्वादिविशिष्टघटादिवैशिष्ट्यभानं न सम्भवति। घटत्वाद्यप्रकारकं घटादिविशिष्टज्ञानं न सम्भवति जात्यतिरिक्तपदार्थज्ञानस्य किञ्चिद्धर्मप्रकारकत्वनियमात्। महत्त्वम्। षड्विधे हेतुरिति द्रव्यप्रत्यक्षे महत्त्वं समवायसम्बन्धेन कारणं द्रव्यसमवेतानां जातिगुणकर्म्मणां प्रत्यक्षे स्वाश्रयसमवायसम्बन्धेन कारणम्। द्रव्यसमवेतानां गुणत्वकर्म्मत्वरूपत्वादीनां प्रत्यक्षे स्वाश्रयसमवेतसमवायसम्बन्धेन कारणमिति। इन्द्रियमिति अत्रापि षड्विध इति अनुषज्यते। इन्द्रियत्वन्तु न जातिः। पृथिवीत्वादिना साङ्कर्य्यप्रसङ्गात्। किन्तु शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वम् आत्मादिवारणाय सत्यन्तम्। उद्भूतविशेषगुणस्य शब्दस्य श्रोत्रे सत्त्वात् शब्देतरेति विशे-

विषयेन्द्रियसम्बन्धो व्यापारः सोऽपि षड्विधः ।
द्रव्यग्रहस्तु संयोगात् संयुक्तसमवायतः ॥ ५९ ॥
द्रव्येषु समवेतानां तथा तत्समवायतः ।
तत्रापि समवेतानां शब्दस्य समवायतः ॥ ६० ॥

णगुणस्य रूपादिष्वपि सत्त्वात् उद्भूतेति उद्भूतत्वं न जातिः शुक्लत्वादिना सङ्करात्। न च शुक्लत्वादिव्याप्य नानैवोद्भूतत्वमिति वाच्यम् उद्भूतरूपत्वादिना चाक्षुषादौ जनकतानुपपत्तेः। किन्तु शुक्लत्वादिव्याप्यमनुद्भूतत्वं नाना तदभावकूटश्चोद्भूतत्वम्। तच्च संयोगादावपि। तथा च शब्देतरोद्भूतगुणः संयोगादिश्चक्षुरादेरस्त्यतो विशेषेति कालादिवारणाय विशेष्यदलम्। इन्द्रियावयवविषयसंयोगस्यापि प्राचां मते प्रत्यक्षजनकत्वात् इन्द्रियावयववारणाय कालादौ रूपाभावप्रत्यक्षे सन्निकर्षघटकतया कारणीभूतचक्षुःसंयोगाद्याश्रयस्य कालादेश्च वारणाय मनःपदं ज्ञानकारणमित्यपि तद्वारणाय। करणमिति असाधारणं कारणं करणम्। असाधारणत्वं व्यापारवत्त्वम् ॥ ५८ ॥

विषयेन्द्रियसम्बन्धो व्यापारः सोऽपि षड्विध इति व्यापारः सन्निकर्षः षड्विधं सन्निकर्षमुदाहरणद्वारा दर्शयति द्रव्यग्रह इति। द्रव्यप्रत्यक्षमिन्द्रियसंयोगजन्यं द्रव्यसमवेतप्रत्यक्षम् इन्द्रियसंयुक्तसमवायजन्यम्। एवमग्रेऽपि। वस्तुतस्तु द्रव्यचाक्षुषं प्रति चक्षुःसंयोगः कारणम्। द्रव्यसमवेतचाक्षुषं प्रति चक्षुःसंयुक्तसमवायः कारणं द्रव्यसमवेतसमवेत-

तद्वृत्तीनां समवेतसमवायेन तु ग्रहः।
विशेषणतया तद्वदभावानां ग्रहो भवेत्॥ ६१॥

चाक्षुषं प्रति संयुक्तसमवेतसमवायः। एवमन्यत्रापि विशिष्यैव कार्य्यकारणभावः परन्तु। परमाणुनीले नीलत्वं पृथिवीपरमाणौ पृथिवीत्वञ्च चक्षुषा कथं न गृह्यते तत्र परम्परया उद्भूतरूपसम्बन्धस्य महत्त्वसम्बन्धस्य च विद्यमानत्वात्। तथा हि नीलत्वं जातिरेकैव घटनीले परमाणुनीले च वर्त्तते। तथा च महत्त्वसम्बन्धो घटनीलमादाय वर्त्तते रूपसम्बन्धस्तूभयमादायैव वर्त्तते एवं पृथिवीत्वे घटादिकमादाय महत्त्वसम्बन्धो बोध्यः। एवं वायौ तदीयस्पर्शादौ च सत्तायाश्चाक्षुषप्रत्यक्षं स्यात् तस्मादुद्भूतरूपावच्छिन्नमहत्त्वावच्छिन्नचक्षुःसंयुक्तसमवायस्य द्रव्यसमवेतचाक्षुषप्रत्यक्षे तादृशचक्षुःसंयुक्तसमवेतसमवायस्य द्रव्यसमवेतसमवेतचाक्षुषे कारणत्वं वाच्यम्। इत्यञ्च परमाणुनीलादौ न नीलत्वादिग्रहः। परमाणुचक्षुःसंयोगस्य महत्त्वावच्छिन्नत्वाभावात् एवं वाय्वादौ न सत्त्वादिचाक्षुषं तत्र चक्षुःसंयोगस्य रूपावच्छिन्नत्वाभावात्। एवं यत्र घटस्य मध्यावच्छेदेनालोकसंयोगः चक्षुःसंयोगस्तु बाह्यावच्छेदेन तत्र घटप्रत्यक्षाभावादालोकसंयोगावच्छिन्नत्वं चक्षुःसंयोगे विशेषणं देयम्। एवं द्रव्यस्पार्शनप्रत्यक्षे त्वक्संयोगः कारणं द्रव्यसमवेतस्पार्शनप्रत्यक्षे त्वक्संयुक्तसम-

समवायः कारणम्। अत्रापि महत्त्वावच्छिन्नत्वम् उद्भूतस्पर्शावच्छिन्नत्वञ्च पूर्ववदेव बोध्यम्। एवं गन्धप्रत्यक्षे घ्राणसंयुक्तसमवायः। गन्धसमवेतस्य घ्राणजन्यप्रत्यक्षे घ्राणसंयुक्तसमवेतसमवायः कारणम्। एवं रसप्रत्यक्षे रसनासंयुक्तसमवायः। रससमवेतस्य रासनप्रत्यक्षे रसनासंयुक्तसमवेतसमवायः कारणम्। शब्दप्रत्यक्षे श्रोत्रावच्छिन्नसमवायः। शब्दसमवेतश्रावणप्रत्यक्षे श्रोत्रावच्छिन्नसमवेतसमवायः कारणम्। अत्र सर्वत्र प्रत्यक्षं लौकिकं बोध्यम्। वक्ष्यमाणमलौकिकं प्रत्यक्षम् इन्द्रियसंयोगादिकं विनापि भवति एवमात्मप्रत्यक्षे मनःसंयोगः। आत्मसमवेतमानसप्रत्यक्षे मनःसंयुक्तसमवायः कारणम्। आत्मसमवेतसमवेतमानसप्रत्यक्षे मनःसंयुक्तसमवेतसमवायः कारणम्। अभावप्रत्यक्षे समवायप्रत्यक्षे च इन्द्रियसम्बद्धविशेषणता हेतुः। वैशेषिकमते तु न समवायः प्रत्यक्षः। अत्र यद्यपि विशेषणता नानाविधा तथाहि भूतलादौ घटाभावः संयुक्तविशेषणतया गृह्यते संख्यादौ रूपाद्यभावः संयुक्तसमवेतविशेषणतया संख्यात्वादौ रूपाद्यभावः संयुक्तसमवेतसमवेतविशेषणतया। शब्दाभावः केवलश्रोत्रावच्छिन्नविशेषणतया। कादौ खत्वाद्यभावः श्रोत्रावच्छिन्नसमवेतविशेषणतया। एवं कत्वादौ गत्वाद्यभावः श्रोत्रावच्छिन्नसमवेतसमवेतविशेषणतया। एवं घटाभावादौ पटाभावः संयुक्त[illegible] [illegible]

[illegible]

यदि स्यादुपलभ्येतेत्येवं यत्र प्रसज्यते।
प्रत्यक्षं समवायस्य विशेषणतया भवेत्॥ ६२॥

यदि स्यादुपलभ्येत इति अभावप्रत्यक्षे योग्यानुपलब्धिः कारणम्। तथा हि भूतलादौ घटादिज्ञाने जाते घटाभावादिकं न ज्ञायते तेनाभावोपलम्भे प्रतियोग्युपलम्भाभावः कारणम् तत्रापि योग्यताप्यपेक्षिता। सा च प्रतियोगिसत्त्वप्रसञ्जनप्रसञ्जितप्रतियोगिकत्वरूपा। तदर्थश्च प्रतियोगिनो घटादेः सत्त्वप्रसक्त्या प्रसञ्जित उपलम्भरूपः प्रतियोगी यस्य स उपलम्भाभावोऽभावप्रत्यक्षे हेतुः। तथा हि यत्रालोकसंयोगादिकं वर्त्तते तत्र यद्यत्र घटः स्यात् तर्हि उपलभ्येत इत्यापादयितुं शक्यते। तत्र घटाभावादिप्रत्यक्षं भवति अन्धकारे तु नापादयितुं शक्यते इति। तेन घटाभावादेरन्धकारे चाक्षुषप्रत्यक्षं न स्पार्शनप्रत्यक्षन्तु भवत्येव। आलोकसंयोगं विनापि स्पार्शनप्रत्यक्षस्यापादयितुं शक्यत्वात्। गुरुत्वादिकं यदयोग्यं तदभावस्तु न प्रत्यक्षः। तत्र गुरुत्वादिप्रत्यक्षस्यापादयितुमशक्यत्वात् वायौ रूपाभावः। पाषाणे सौरभाभावः। गुडे तिक्ताभावः। श्रोत्रे शब्दाभावः। आत्मनि सुखाभावः। एवमादयस्तत्तदिन्द्रियैर्गृह्यन्ते तत्तत्प्रत्यक्षस्यापादयितुं शक्यत्वात्। संसर्गाभावप्रत्यक्षे प्रतियोगिनो योग्यता। अन्योन्याभावप्रत्यक्षे त्वधिकरणयोग्यताऽपेक्षिता। अतः स्तम्भादौ

अलौकिकः सन्निकर्षस्त्रिविधः परिकीर्त्तितः।
सामान्यलक्षणा ज्ञानलक्षणा योगजस्तथा ॥६३॥

प्रत्यक्षं लौकिकालौकिकभेदेन द्विविधम्। तत्र लौकिकप्रत्यक्षे षोढा सन्निकर्षा वर्णिताः। अलौकिकसन्निकर्षानिदानीं वदति। अलौकिक इति। व्यापारः सन्निकर्षः। सामान्यलक्षणेति। सामान्यं लक्षणं यस्या इत्यर्थः। तत्र लक्षणपदेन यदि स्वरूपमुच्यते तदा सामान्यस्वरूपा प्रत्यासत्तिरित्यर्थो लभ्यते। तच्चेन्द्रियसम्बद्धविशेष्यकज्ञाने प्रकारीभूतं बोध्यम्। तथाहि यत्र इन्द्रियसंयुक्तो धूमादिस्तद्विशेष्यकं धूम इति ज्ञानं जातम्। तत्र ज्ञाने धूमत्वं प्रकारः। धूमत्वेन सन्निकर्षेण धूम इत्येवं रूपं सकलधूमविषयकं ज्ञानं जायते। अत्र यदि इन्द्रियसम्बद्धमित्येवोच्यते तदा धूनोपटले धूमत्वस्य मानन्तरं सकलधूमविषयकं ज्ञानं न स्यात्। तत्र धूमत्वेन सह इन्द्रियसम्बन्धाभावात्। मन्मते तु इन्द्रियसम्बद्धं धूलीपटलं तद्विशेष्यकं धूम इति ज्ञानं तत्र प्रकारीभूतं धूमत्वं प्रत्यासत्तिः। इन्द्रियसम्बन्धो लौकिको ग्राह्य। इदञ्च वहिरिन्द्रियस्थले। मानसस्थले तु ज्ञानप्रकारीभूतसामान्यमात्रं प्रत्यासत्तिः। अत शब्दादिना यत्किञ्चित् पिशाचाद्युपस्थितौ मानसः सकलपिशाचादिबोध उपपद्यते। परन्तु समानानां भाव. सामान्यम्। तच्च क्वचिन्नित्य धूमत्वादि क्वचिदनित्यं घटादि। यत्रैको घट. संयोगेन भूतले समवायेन कपाले ज्ञातस्तदनन्तरं सर्वेषामेव तद्घटवतां भूतलादीनां कपालादीनां वा ज्ञानं

यदि स्यादुपलभ्येतेत्येवं यत्र प्रसज्यते।
प्रत्यक्षं समवायस्य विशेषणतया भवेत्॥६२॥

यदि स्यादुपलभ्येत इति अभावप्रत्यक्षे योग्यानुपलब्धि: कारणम्। तथा हि भूतलादौ घटादिज्ञाने जाते घटाभावादिज्ञं न जायते तेनाभावोपलम्भे प्रतियोग्युपलम्भाभाव: कारणम् तथापि योग्यताप्यपेक्षिता। सा च प्रतियोगिसत्त्वप्रसञ्जनप्रसञ्जितप्रतियोगिकत्वरूपा। तदर्थं प्रतियोगिनो घटादे: सत्त्वप्रसक्त्या प्रसञ्जित उपलम्भरूपः प्रतियोगी यस्य स उपलम्भाभावोऽभावप्रत्यक्षे हेतुः। तथा हि यत्रालोकसंयोगादिकं वर्तते तत्र यद्यत्र घट: स्यात् तर्हि उपलभ्येत इत्यापादयितुं शक्यते। तत्र घटाभावादिप्रत्यक्षं भवति अन्धकारे तु नापादयितुं शक्यते इति घटाभावादेरन्धकारे चाक्षुषप्रत्यक्षं न स्यादेव। आलोकसंयोगं विनापि स्पार्शनप्रत्यक्ष... शक्यत्वात्। ... गुरुत्वादिकं यदयोग्यं तदभावस्तु न ... । तत्र गुरुत्वादिप्रत्यक्षस्यापादयितुमशक्यत्वात्। ... रूपाभावः। पाषाणे सौरभाभावः। गुडे तिक्ता... श्रोत्रे शब्दाभावः। आत्मनि सुखाभावः। एव... ...ादिन्द्रियैर्गृह्यन्ते तत्तत्प्रत्यक्षस्यापादयितुं शक्य... ...संसर्गाभावप्रत्यक्षे प्रतियोगिनो योग्यता। अन्यो... ...क्षे त्वधिकरणयोग्यताऽपेक्षिता। ... ...ऽपि चक्षुषा ग्रह...

योगजो द्विविधः प्रोक्तो युक्तयुञ्जानभेदतः ॥ ६५॥

[illegible]पि ज्ञानरूपा तदा तयोर्भेदो न स्यादत आह। विषयी यस्य तस्यैव व्यापारो ज्ञानलक्षण इति। सामान्यलक्षणा प्रत्यासत्तिर्हि तदाश्रयस्य ज्ञानं जनयति। ज्ञानलक्षणा प्रत्यासत्तिस्तु यद्विषयकं ज्ञानं तस्यैव प्रत्यासत्तिरिति। अत्रेदं बोध्यम्। प्रत्यक्षे सन्निकर्षं विना भानं न सम्भवति। तथा च सामान्यलक्षणां विना धूमत्वेन सकलधूमानां वह्नित्वेन सकलवह्नीनाञ्च भानं कथं भवेत् तदर्थं सामान्यलक्षणा स्वीक्रियते। न च सकलवह्निधूमभानाभावे का क्षतिरिति वाच्यम् प्रत्यक्षधूमे वह्निसम्बन्धस्य गृहीतत्वात् धूमान्तरस्य चानुपस्थितत्वाद् धूमो वह्निव्याप्यो न वेति संशयानुपपत्तेः। मन्मते तु सामान्यलक्षणया सकलधूमोपस्थितौ कालान्तरीयदेशान्तरीयधूमे वह्निव्याप्यत्वसन्देहः सम्भवति। न च सामान्यलक्षणास्वीकारे प्रमेयत्वेन सकलप्रमेयज्ञाने सार्वज्ञापत्तिरिति वाच्यम्। प्रमेयत्वेन सकलप्रमेयज्ञानेऽपि विशिष्य सकलपदार्थानामज्ञातत्वेन सार्वज्ञ्याभावात्। एवं ज्ञानलक्षणाया अस्वीकारे सुरभि चन्दनमिति ज्ञाने सौरभस्य भानं कथं स्यात्। यद्यपि सामान्यलक्षणयापि सौरभभानं सम्भवति तथापि सौरभत्वस्य भानं ज्ञानलक्षणया। एवं यत्र धूमत्वेन धूलीपटले ज्ञानं तत्र [illegible] भानं ज्ञानलक्षणया।

[illegible] योगजो [illegible] योगाभ्यासजनितो धर्म- [illegible] युक्तयुञ्जानभेदेन

आसत्तिराश्रयाणान्तु सामान्यज्ञानमिष्यते।
तदिन्द्रियजतद्धर्मबोधसामग्र्यपेक्ष्यते ॥ ६४ ॥
विषयी यस्य तस्यैव व्यापारो ज्ञानलक्षणः।

भवति। एवेदं बोध्यं सामान्यं येन सम्बन्धेन ज्ञायते सम्बन्धेन अधिकरणाना प्रत्यासत्तिः ॥ ६३ ॥

किन्तु यत्र तद्घटनाशानन्तरं तद्घटवतः स्मरणं जातं सामान्यलक्षणया सर्वेषां तद्घटवतां भानं न स्यात्। न्यस्य तदानीमभावात्।

किन्तु इन्द्रियसम्बद्धविशेष्यकं घट इति यत्र ज्ञानम् तत्र सामा टिनेन्द्रियसम्बन्धं विनापि तादृशज्ञानप्रकारीभूतसामान्यस्य सत्त्वात् तादृशज्ञानं कुतो न जायते। तस्मात् सामान्यज्ञानं प्रत्यासत्तिर्न तु सामान्यमित्याह। आसत्तिरित्यादि। आसत्तिः प्रत्यासत्तिरित्यर्थः। तया च सामान्यलक्षणेत्यत्र लक्षणशब्दस्य विषयोऽर्थः। तेन सामान्यविषयकं ज्ञानं प्रत्यासत्तिरित्यर्थो लभ्यते। ननु चक्षुःसंयोगादिकं विनापि सामान्यज्ञानं यत्र वर्त्तते तत्र सकलघटादीनां चाक्षुषादिप्रत्यक्षं स्यादत आह। तदिन्द्रियज इति। अस्यार्थः। यदा बहिरिन्द्रियेण सामान्यलक्षणया ज्ञानं जननीयं तदा यत्किञ्चिद्धर्मिणि तत्सामान्यस्य तदिन्द्रियजन्यज्ञानसामग्री अपेक्षिता। सा च सामग्री चक्षुःसंयोगालोकसंयोगादिकम्। तेनान्धकारादौ चक्षुरादिना तादृशज्ञानं न जायते ॥ ६४ ॥

ननु ज्ञानलक्षणा प्रत्यासत्तिर्यदि ज्ञानरूपा

युक्तस्य सर्वदा भानं चिन्तासहकृतोऽपरः ।
व्यापारस्तु परामर्शः करणं व्याप्तिधीर्भवेत् ॥६६॥
अनुमायां ज्ञायमानं लिङ्गन्तु करणं न हि ।
अनागतादिलिङ्गेन न स्यादनुमितिस्तदा ॥६७॥

इति । युक्तयुञ्जानरूपयोगिद्वैविध्याद्धर्मस्यापि द्वैविध्य-
भावः ॥ ६५ ॥

युक्तस्य सर्वदा भानमिति । योगाभ्यासवशीकृतमान
समाधिसमासादितविविधसिद्धियुक्त इत्युच्यते । अक्ल
विशिष्टयोगवत्त्वाद् वियुक्त इत्यप्युच्यते । सर्वदेति । चिन्
सहकारिणं विनेत्यर्थः । भानं सर्वविषयाणां प्रत्यक्ष
अपरो युञ्जानो विषयव्यावृत्तमानसः । चिन्ता ध्यानं म
सस्तदेकाग्रीकरणम् । तत्सहकारात् स्थूलसूक्ष्मव्यवहि
विप्रकृष्टानर्थान् प्रत्यक्षीकरोतीत्यर्थः ।

अनुमितिं व्युत्पादयति । व्यापारस्त्विति । अनुमाय
अनुमितौ व्याप्तिज्ञानं करणम् । परामर्शो व्यापारः । तथ
हि येन पुरुषेण महानसादौ धूमे वह्नेर्व्याप्तिर्गृहीता पश्चा
स एव पुरुषः क्वचित् पर्वतादौ अविच्छिन्नमूलां धूमलेखा
पश्यति तदनन्तरं धूमो वह्निव्याप्य इत्येवं रूपं व्याप्तिस्मरण
भवति । तस्माच्च वह्निव्याप्यधूमवानयमिति ज्ञानं भवति स
एव परामर्श इत्युच्यते । तदनन्तरं पर्वतोऽयं वह्निमानिति ज्ञानं
जायते । तदेवानुमितिः । अत्र प्राचीनाम् व्याप्यत्वेन
ज्ञायमानं धूमादिकमनुमितिकरणम् । तद् दूषयति ज्ञाय-
मानमिति ।

व्याप्तस्य पक्षवृत्तित्वधीः परामर्श उच्यते।
व्याप्तिस्तु साध्याभाववदवृत्तित्वं प्रकीर्त्तितम्।
यद्वा साध्यवदन्यस्मिन्नसम्बन्ध उदाहृतः॥ ६८॥

लिङ्गस्यानुमित्यकरणत्वे युक्तिमाह। अनागतादीति। यद्यनुमितौ लिङ्गं करणं स्यात् तदा अनागतेन विनष्टेन वा लिङ्गेन अनुमितिर्न स्यात्। अनुमितिकरणस्य लिङ्गस्य तदानीमभावात्॥ ६६। ६७॥

व्याप्तस्य पक्षधर्मत्वधीरिति। व्याप्तिविशिष्टस्य पक्षेण सह वैशिष्ट्यावगाहिज्ञानमनुमितिजनकम्। तच्च व्याप्यः पक्ष इति ज्ञानम्। पक्षो व्याप्यवानिति ज्ञानं वा। अनुमितिस्तु पक्षे व्याप्य इति ज्ञानात् पक्षे साध्यम् इत्याकारिका। पक्षो व्याप्यवानिति ज्ञानात् पक्षः साध्यवानित्याकारिका। द्विविधादपि परामर्शात् पक्षः साध्यवानित्येवानुमितिरित्यन्ये। ननु वह्निव्याप्यधूमवान् पर्वत इति ज्ञानं विनापि यत्र पर्वतो धूमवानिति प्रत्यक्षं ततो धूमो वह्निव्याप्य इति स्मरणं भवति तत्र ज्ञानद्वयादनुमितेर्दर्शनात् व्याप्तिविशिष्टवैशिष्ट्यावगाहिज्ञानं सर्वत्र न कारणं किन्तु व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानत्वेन कारणत्वम् आवश्यकत्वात्। विशिष्टवैशिष्ट्यज्ञानकल्पने गौरवादिति चेत्। व्याप्यतावच्छेदकप्रकारेऽपि वह्निव्याप्यवानिति ज्ञानादनुमित्युदये। लाघवाच्च व्याप्तिप्रकारकपक्षधर्मताज्ञानत्वेनैव कारणत्वम्। किन्तु धूमवान् पर्वत इति ज्ञान, अनुमितावपि। व्याप्यतावच्छेदकधूमत्वप्रकारकत्व

धर्म्मताज्ञानस्य सत्त्वात्। न च तदानीं धूमत्वाव-
तावच्छेदकप्रकारकपक्षधर्म्मताज्ञानस्य हेतुत्वमिति वाच्यं
चैत्रस्य व्याप्तिग्रहे मैत्रस्य पक्षधर्म्मताज्ञानादनुमितिः स्या-
दिति। यदि तु तत्पुरुषीयत्वस्वात्मना व्याप्यतावच्छेद-
प्रकारकतत्पुरुषीयपक्षधर्म्मताज्ञानं तत्पुरुषीयानुमितौ हे-
तुरुच्यते तदा अनन्तकार्य्यकारणभावः। मन्मते तु समवे-
व्याप्तिप्रकारकपक्षधर्म्मताज्ञानं समवायेनानुमितिं प्रति
त्येवं नानन्तकार्य्यकारणभावः। यदि तु व्याप्तिप्रका-
ज्ञानं पक्षधर्म्मताज्ञानञ्च स्वतन्त्रं कारणमित्युच्यते त-
दा कार्य्यकारणभावद्वयं वह्निव्याप्यो धूम आलोकवान् प-
इति ज्ञानादप्यनुमितिः स्यादिति। इत्थञ्च यत्र दृ-
तत्रापि विशिष्टज्ञानं कल्पनीयम्। फलमुखगौरव-
दोषत्वात् इति।

व्याप्यो नाम व्याप्त्याश्रयः. तत्र का व्याप्तिरित्यत आह
व्याप्तिरिति। साध्यवदन्येति। वह्निमान् धूमादित्यत्र
साध्यो वह्निः। साध्यवान् महानसादि। तदन्यो ज-
ह्रदादिः। तद्वृत्तित्वं धूमस्येति लक्षणसमन्वयः। धूमवान्
वह्नेरित्यादौ साध्यवदन्यस्मिन्नयःपिण्डादौ वह्निस-
नातिव्याप्तिः। अत्र येन सम्बन्धेन साध्यं तेनैव सम्बन्धेन
साध्यवान् बोध्यः। अन्यथा समवायसम्बन्धेन वह्निमा-
वह्नेरवयवस्तदन्यो महानसादि। तत्र धूमस्य वि-
मानत्वादव्याप्तिप्रसङ्गात्। साध्यवदन्यश्च साध्यवत्त्वावच्छि-
प्रतियोगिताकभेदवान् बोध्यः। तेन यत्किञ्चिद्वह्निमा-
महानसादिभिन्ने पर्वतादौ धूमस्य सत्त्वेऽपि न क्षति

अथवा हेतुमन्निष्ठविरहाप्रतियोगिना।
साध्येन हेतोरैकाधिकरण्यं व्याप्तिरुच्यते ॥६९॥

येन सम्बन्धेन हेतुस्तेन सम्बन्धेन साध्यवदन्यवृत्तित्वं बोध्यम् तेन साध्यवदन्यस्मिन् धूमावयवे धूमस्य समवायसम्बन्धेन सत्त्वेऽपि न क्षतिः। साध्यवदन्यावृत्तित्वं साध्यवदन्यवृत्तित्वत्वावच्छिन्नाभावः। तेन धूमवान् वह्नेरित्यत्र साध्यवदन्यह्रदादिवृत्तित्वाभावेऽपि नातिव्याप्तिः। अत्र यद्यपि द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वादित्यादौ विशिष्टसत्तायाः सत्तायाश्चैक्यात् साध्यवदन्यस्मिन् गुणादाववृत्तित्वं नास्तीति तथापि हेतुतावच्छेदकरूपेणावृत्तित्वं वाच्यम्। हेतुतावच्छेदकं तादृशवृत्तितानवच्छेदकमिति फलितार्थः। ननु केवलान्वयिज्ञेयत्वादौ साध्ये साध्यवदन्याप्रसिद्धत्वादव्याप्ति। ६८।

किञ्च सत्तावान् जातेरित्यादौ साध्यवदन्यस्मिन् सामान्यादौ हेतुतावच्छेदकसम्बन्धेन समवायेन वृत्तेरप्रसिद्धत्वादव्याप्तिश्चात आह अथवा हेतुमन्निष्ठेति। हेतुमति निष्ठा वृत्तिर्यस्य स तथा विरहोऽभाव। तथाच हेत्वधिकरणवृत्तिर्योऽभाव' तदप्रतियोगिना साध्येन सह हेतोः सामानाधिकरण्यं व्याप्तिः। यद्यपि वह्निमान् धूमादित्यादौ हेत्वधिकरणपर्वतादिवृत्त्यभावप्रतियोगित्व तत्तद्वह्न्यादेरस्तीत्यव्याप्ति। न च समानाधिकरणवह्निधूमयोरेव व्याप्तिरिति वाच्यम्। तद्वह्नेरप्यभयाभावसत्त्वादेकसत्त्वेऽपि द्वयं नास्तीति प्रतीतेः। गुणवान् द्रव्यत्वादित्यादावव्याप्तेश्च।

[illegible]
[illegible] ।
[illegible]
[illegible]
[illegible] इति [illegible]
[illegible]
स्यात् । न हि [illegible]
[illegible] ।
[illegible]
[illegible]
सत्त्वात् । [illegible] साध्ये [illegible]
[illegible] प्रतियोगितावच्छेदकमिति वाच्यं
हेत्वधिकरणम् । हेतुतावच्छेदकावच्छिन्नाधिकरणं ग्राह्यम् ।
तेन द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वादित्यादौ गुणकर्माधि-
करणगुणादिनिष्ठाभावप्रतियोगित्वेऽपि द्रव्यत्वस्य ना-
व्याप्तिः । हेतुतावच्छेदकसम्बन्धेन हेत्वधिकरणं बोध्यम् ।
तेन समवायेन धूमाधिकरणतदवयवनिष्ठाभावप्रतियोगि-
त्वेऽपि वह्नेर्नाव्याप्तिः । अभावश्च प्रतियोगिव्यधिकरणो
बोध्यः । तेन कपिसंयोगी एतद्वृक्षत्वादित्यादौ मूलावच्छे-
देनैव एतद्वृक्षवृत्तिकपिसंयोगाभावप्रतियोगित्वेऽपि संयो-
गस्य नाव्याप्तिः । न च प्रतियोगिव्यधिकरणत्वं प्रतियोग्य-
नधिकरणवृत्तित्वम् । तदा तथैवाव्याप्तिः । प्रतियोगिनः
कपिसंयोगस्यानधिकरणगुणादौ वर्त्तते योऽभावस्तस्यैव
मूलावच्छेदेन सत्त्वात् यदि प्रतियोग्यधिकरणावृत्तित्वं तदा

संयोगिसत्त्वादित्यादावतिव्याप्तिः । सत्त्वाधिकरणे गुणादौ
यः संयोगाभावस्तस्य प्रतियोग्यधिकरणद्रव्यवृत्तित्वादिति
वाच्यम् । हेत्वधिकरणे प्रतियोग्यनधिकरणवृत्तित्वविशिष्टस्य
विवक्षितत्वात् । स्वप्रतियोग्यनधिकरणीभूतहेत्वधिकरण-
वृत्त्यभाव इति निष्कर्षः । प्रतियोग्यनधिकरणं स्वप्रति-
योगितावच्छेदकसम्बन्धेन प्रतियोगितावच्छेदकावच्छिन्ना-
नधिकरणं बोध्यम् । तेन विशिष्टसत्त्वाभावान् जातेरित्यादौ
जात्यधिकरणगुणादौ विशिष्टसत्त्वाभावप्रतियोगिसमाना-
धिकरणत्वेऽपि न क्षतिः । एवं साध्यतावच्छेदकसम्बन्धेन
प्रतियोग्यनधिकरणत्वं बोध्यम् । तेन ज्ञानवान् द्रव्यत्वा-
दित्यादौ द्रव्यत्वाधिकरणघटादेर्विषयतासम्बन्धेन ज्ञाना-
धिकरणत्वेऽपि न क्षतिः । इत्थञ्च वह्निमान् धूमादित्यादौ
धूमाधिकरणे समवायेन वह्निविरहसत्त्वेऽपि न क्षतिः ।
ननु प्रतियोगितावच्छेदकावच्छिन्नस्य यस्य कस्यचित् तत्-
सामान्यस्य वा अनधिकरणत्वम् । यत्किञ्चित्प्रतियोगि-
तावच्छेदकावच्छिन्नस्य वानधिकरणत्वमुक्तम् । आद्ये
कपिसंयोगी एतद्वृक्षत्वादित्यादावव्याप्तिः । कपिसंयोगा-
भावस्य हि प्रतियोगितावच्छेदकावच्छिन्नो वृक्षावृत्तिरपि
कपिसंयोगो भवति तदनधिकरणञ्च वृक्ष इति । द्वितीये
प्रतियोगिव्यधिकरणाभावाप्रसिद्धिः । सर्वस्यैवाभावस्य पूर्व-
क्षणवृत्तित्वविशिष्टस्वाभावात्मक प्रतियोगिसमानाधिकरण-
त्वात् । न च वह्निमान् धूमादित्यादौ घटाभावादेः पूर्व-
क्षणवृत्तित्वविशिष्टस्वाभावात्मकप्रतियोग्यधिकरणत्वं यद्यपि
पर्वतादेस्तथापि साध्यतावच्छेदकसम्बन्धेन तदनधिक

नधिकरणवृत्तित्वमस्त्येवेति घटपटान्यतरत्वादिति घटाभ घटाभावे घटाभावस्तस्य घटाभावात्मकतया घटा भावस्य वह्निरपि प्रतियोगी तदधिकरणम् पर्वतादीति कमेण प्रतियोग्यनधिकरणत्वाप्रसिद्धत्वात्। यदि च घटा भावादौ घटाभावादिभिन्न इत्युच्यते तथापि धूमाभाव वान्। घटाभावादित्यादावव्याप्तिः। तत्र साध्यता वच्छेदकसम्बन्धः स्वरूपसम्बन्धः। तेन सम्बन्धेन सर्वे षामभावस्य च पूर्वक्षणवृत्तित्वविशिष्टस्याभावात्मकप्रति योग्यधिकरणत्वं हेत्वधिकरणस्येति दूषणीयं तु कपिसं योगाभाववान् आत्मत्वादित्यादावव्याप्तिः। तत्रात्मवृत्ति- कपिसंयोगाभावाभावः कपिसंयोगस्तस्य च गुणत्वात् तत् प्रतियोगितावच्छेदकं गुणसामान्याभावत्वमपि तदव- च्छिन्नानधिकरणत्व हेत्वधिकरणस्यात्मन इति। नैवम्। यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं हेतुमत- स्तादृशप्रतियोगितानवच्छेदकत्वस्य विवक्षितत्वात्। ननु कालो घटवान् कालपरिमाणादित्यत्राव्याप्तिः। प्रतियोगि- व्यधिकरणाभावाप्रसिद्धेर्हेत्वधिकरणस्य महाकालस्य जगदा- धारतया सर्वेषामभावानां साध्यतावच्छेदकसम्बन्धेन कालि- कविशेषणतया प्रतियोग्यधिकरणत्वात्। अत्र केचित् महाकालभेदविशिष्टघटाभावस्तत्र प्रतियोगिव्यधिकरण- महाकालस्य घटाभावत्वेऽपि महाकालभेदविशिष्टघटा- नाधारत्वात्। महाकाले महाकालभेदाभावात्। वस्तु- तस्तु प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोग्यनधिकरणी-

सिषाधयिषया शून्या सिद्धिर्यत्र न विद्यते।

वह्नित्वत्वधर्मावच्छिन्नत्वोभयाभावत्वेन सम्बन्धेन तद्धर्मावच्छिन्नस्य तत्र हेतुव्यापकत्वं बोध्यम्। व्यापकसामानाधिकरण्यञ्च व्याप्तिः। यत्सम्बन्धः साध्यतावच्छेदकसम्बन्धः। यद्धर्मः साध्यतावच्छेदकः तत्र यदि यद्धर्मावच्छिन्नत्वाभावमात्रमित्युच्यते तदा समवायेन यो वह्न्यभावस्तस्य प्रतियोगितावच्छेदकसम्बन्धः समवायस्तेन प्रतियोग्यनधिकरणपर्वतादिवृत्ति स एव तत्प्रतियोगितावच्छेदकश्च वह्नित्वमित्यव्याप्तिः स्यात्। यदि च तत्सम्बन्धावच्छिन्नत्वाभावमात्रमुच्यते तदा तादृशस्य संयोगेन घटाभावस्य प्रतियोगितायां संयोगसम्बन्धावच्छिन्नत्वसत्त्वादव्याप्तिः स्यादत उभयमुपात्तम्। इत्थञ्च कालो घटवान् कालपरिमाणादित्यादौ संयोगसम्बन्धेन यो घटाभावस्तत्प्रतियोगिनो घटस्यानधिकरणे महाकाले वर्तमान स एव संयोगेन घटाभावस्तस्य प्रतियोगितायां कालिकसम्बन्धावच्छिन्नत्वघटत्वावच्छिन्नत्वोभयाभावसत्त्वादव्याप्तिः। धूमवान् वह्नेरित्यादावतिव्याप्तिवारणाय सामान्यपदमुपात्तम्। ननु प्रमेयवह्निमान् धूमादित्यादौ प्रमेयवह्नित्वावच्छिन्नत्वमप्रसिद्धम्। गुरुधर्मस्यानवच्छेदकत्वादिति चेन्न। कम्बुग्रीवादिमान् नास्तीति प्रतीत्या कम्बुग्रीवादिमत्त्वावच्छिन्नप्रतियोगिताविषयीकरणेन गुरुधर्मस्याप्यवच्छेदकत्वस्वीकारादिति संक्षेपः। ६८।

पक्षतामिलितलिङ्ग पक्षत्वं किं तदाह। सिषाधयिषया

स पक्षस्तत्र वृत्तित्वज्ञानादनुमितिर्भवेत् ॥ ७० ॥

शून्या सिद्धिरित्यादि। सिषाधयिषाविरहविशिष्टाया सिद्धेरभावः पक्षता तद्वान् पक्ष इत्यर्थः। सिषाधयिषामात्रं न पक्षता। विनापि सिषाधयिषा घनगर्जितेन मेघानुमानात्। सिद्धौ सत्यामपि सिषाधयिषासत्त्वेऽनुमितिर्भवत्येव। अतः सिषाधयिषा विरहविशिष्टत्वं सिद्धौ विशेषणम्। तथा च यत्र सिद्धिर्नास्ति तत्र सिषाधयिषायां सत्यामसत्यामपि पक्षता। यत्र च सिषाधयिषाऽस्ति तत्र सिद्धौ सत्यामसत्यामपि पक्षता। यत्र च सिद्धिरस्ति सिषाधयिषा च नास्ति तत्र न पक्षता। सिषाधयिषाविरहविशिष्टसिद्धेः सत्त्वात्। ननु यत्र परामर्शानन्तरं सिद्धिस्ततः सिषाधयिषा यत्र सिषाधयिषाकाले परामर्शनाशान्नानुमितिः। यत्र सिद्धिपरामर्शसिषाधयिषाः क्रमेण भवन्ति तत्र सिषाधयिषाकाले सिद्धेर्नाशात् प्रतिबन्धकाभावादेवानुमितिः। यत्र सिषाधयिषासिद्धिपरामर्शाः सन्ति तत्र परामर्शकाले सिषाधयिषैव नास्ति। एवमन्यत्रापि सिद्धिकाले परामर्शकाले वा न सिषाधयिषा योग्यविभुविशेषगुणानां यौगपद्यनिषेधात् कथं सिषाधयिषाविरहविशिष्टत्वं सिद्धेर्विशेषणमिति चेन्न। यत्र वह्निव्याप्यधूमवान् पर्वतो वह्निमानित्यनुमितिः सुखसाधनमिति प्रत्यक्षं स्मरणं वा। ततः सिषाधयिषा। तत्र पक्षतासम्पत्तये सिषाधयिषाविरहविशिष्टत्वविशेषणस्यावश्यकत्वादिति। अत्रेदं बोध्यं यादृशयादृशसिषाधयिषासत्त्वे सिद्धिसत्त्वे यल्लिङ्गकानु

अनैकान्तो विरुद्धश्चाप्यसिद्धः प्रतिपक्षितः ।

मितिस्तादृशसिषाधयिषा-विरह-विशिष्ट-सिद्ध्यभावस्तल्लिङ्गकानुमितौ पक्षता। तेन सिद्धिपरामर्शसत्त्वेऽपि यत्किञ्चिज्ज्ञानं जायतामितीच्छायामपि नानुमितिः। वह्निव्याप्यधूमवान् पर्वतो वह्निमानिति प्रत्यक्षसत्त्वे प्रत्यक्षातिरिक्तं वह्निज्ञानं जायतामितीच्छायान्तु भवत्येव। एवं धूमपरामर्शसत्त्वे आलोकेन वह्निमनुमिनोमि इति इच्छायामपि नानुमितिः। सिषाधयिषाविरहकाले यादृशसिद्धिसत्त्वे नानुमितिस्तादृशी सिद्धिर्विशिष्य तत्तदनुमितिप्रतिबन्धिका वक्तव्या। तेन पर्वतस्तेजस्वी पाषाणमयो वह्निमानिति ज्ञानसत्त्वेऽप्यनुमितेर्न विरोधः परन्तु पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धावपि तदवच्छेदेनानुमितिदर्शनात्। पक्षतावच्छेदकावच्छेदेनानुमितिं प्रति पक्षतावच्छेदकावच्छेदेन सिद्धिरेव प्रतिबन्धिका। पक्षतावच्छेदकसामानाधिकरण्येनानुमितिं प्रति तु सिद्धिमात्रं विरोधि। इदन्तु बोध्यम्। यत्र पुरुषो न वेति संशयानन्तरं पुरुषत्वव्याप्यकरादिमानयम् इति ज्ञानं तत्रापत्यामनुमितायां पुरुषत्वस्य प्रत्यक्षं भवति न त्वनुमितिरतोऽनुमित्साविरहविशिष्टसमानविषयकप्रत्यक्षसामग्री कामिनीजिज्ञासादिवत् स्वातन्त्र्येण प्रतिबन्धिका। एवं परामर्शानन्तरं विनापि प्रत्यक्षेच्छां घटादिप्रत्यक्षानुत्पत्तेः। प्रत्यक्षेच्छाविरहविशिष्टानुमितिसामग्री भिन्नविषयकप्रत्यक्षे प्रतिबन्धिका। ७१।

प्रकृतस्य [illegible] विभागान् विवृणोति । अनैका-

आद्यः साधारणस्तु स्यात् स्यादसाधारणो मतः।
तथैवानुपसंहारी त्रिधानैकान्तिको भवेत्॥७२॥

विरोधित्वं तेन एव हेतौ व्यभिचारग्रहे हेत्वन्तरेणानुमित्युत्पत्तेः तदभावाद्यवगाहित्वाच्च व्यभिचारज्ञानस्यानुमितिविरोधित्वाभावेऽपि न क्षतिरिति संक्षेपः। यादृशपक्षसाध्यहेतौ यावन्तो दोषास्तावदन्योन्यत्वं तत्र हेत्वाभासत्वम्। पञ्चत्वकथनन्तु तल्लक्षणवत्त्वाभिप्रायेण। एवं साधारण्यादन्यतमत्वम् अनैकान्तिकत्वम्॥७१॥

आद्य साधारण इत्यादि। साधारणः साध्यवदन्यवृत्तिर्हेतुः। तेन च व्याप्तिग्रहप्रतिबन्धः क्रियते। असाधारणः साध्यासमानाधिकरणो हेतुः। तेन साध्यसामानाधिकरण्यग्रहः प्रतिबध्यते। यथा शब्दो नित्यः शब्दत्वादित्यादौ न साधारण्यम्। शब्दोऽनित्यः शब्दत्वादित्यादौ असाधारण्यमेव। अन्ये तु सपक्षावृत्तिरसाधारणः। सपक्षश्च निश्चितसाध्यवान्। इत्थञ्च शब्दोऽनित्यः शब्दत्वादित्यादौ पक्षे यदा साध्यनिश्चयस्तदा नासाधारण्यं तत्र हेतुनिश्चयादिति वदन्ति। अनुपसंहारी च अत्यन्ताभावाप्रतियोगिसाध्यकादिः। तेन च व्यतिरेकव्याप्तिग्रहप्रतिबन्धः क्रियते। विरुद्धस्तु साध्यव्यापकीभूताभावप्रतियोगी। अयञ्च साध्याभावग्रहसामग्रीत्वेन प्रतिबन्धकः। सत्प्रतिपक्षे तु प्रतिहेतुः साध्याभावसाधकः। अत्र तु हेतुरेवेति विशेषः। साध्याभावसाधक एव साध्यसाधकत्वेन उपन्यस्त इत्यतो हि-
[illegible] लिङ्गे सत्प्रतिपक्ष साध्याभाव-

कालात्ययोपदिष्टश्च हेत्वाभासास्तु पञ्चधा ॥७१॥

इत्यादि। तल्लक्षणन्तु यद्विषयकत्वेन ज्ञानस्यानुमितिविरोधित्वं तत्त्वं तथाहि व्यभिचारादिविषयकत्वेन ज्ञानस्यानुमितिविरोधित्वात्ते दोषाः। यद्विषयकत्वञ्च यादृशविशिष्टविषयकत्वं बोध्यम्। तेन बाधभ्रमस्यानुमितिविरोधित्वेऽपि न क्षतिः तत्र पर्वतो वह्न्यभाववानिति विशिष्टस्याप्रसिद्धत्वात् न हेतुदोषाः न च वह्न्यभावव्याप्यपाषाणमयत्ववान् पर्वत इति परामर्शकाले वह्निव्याप्यधूमस्याभासत्वं न स्यात् तत्र वह्न्यभावव्याप्यवान् पक्ष इति विशिष्टस्याप्रसिद्धत्वादिति वाच्यम्। इष्टापत्तेः। अन्यथा बाधभ्रमस्याप्यनित्यदोषत्वापत्तेः। तस्मात् तत्र वह्न्यभावव्याप्यपाषाणमयत्ववान् इति परामर्शकाले वह्निव्याप्यधूमस्य नाभासत्वं भ्रमादनुमितिप्रतिबन्धमात्रम्। हेतुस्तु न दुष्ट इति। इत्थञ्च साध्याभाववद्वृत्तिहेत्वादिकं दोषः तद्वत्ता च हेतौ येन केनापि सम्बन्धेनेति नव्याः। परे तु यद्विषयकत्वेन ज्ञानस्यानुमितिविरोधित्वं तद्वत्त्वं हेत्वाभासत्वम्। सत्प्रतिपक्षे विरोधिव्याप्त्यादिकमेव तथा। तद्वत्त्वं हेतोर्ज्ञानरूपसम्बन्धेन। न चैवं वह्निमान् धूमादित्यादौ बाधभ्रमे पक्षे साध्याभावविषयकत्वेनानुमितिविरोधित्वाज्ज्ञानरूपसम्बन्धेन तद्वत्त्वस्यापि सत्त्वात् सद्धेतोरपि बाधितत्वापत्तिरिति वाच्यम्। तत्र ज्ञानस्य सम्बन्धत्वाकल्पनात्। अत्र सत्प्रतिपक्षित इति व्यवहारेण तत्कल्पनात्। तत्र बाधितव्यवहाराभावादित्याहुः। अनुमितिविरोधित्वञ्च अनुमितितत्कारणान्यतर

आद्यः साधारणस्तु स्यात् स्यादसाधारणो मतः।
तथैवानुपसंहारी त्रिधानैकान्तिको भवेत् ॥७२॥

विरोधित्वं तेन एकहेतौ व्यभिचारग्रहे हेत्वन्तरेणानुमित्युत्पत्तेस्तदभावाद्यनवगाहित्वाच्च व्यभिचारज्ञानस्यानुमितिविरोधित्वाभावेऽपि न क्षतिरिति संक्षेपः। यादृशपक्षसाध्यहेतौ यावन्तो दोषास्तावदन्योऽन्यत्वं तत्र हेत्वाभासत्वम्। पञ्चकथनन्तु तत्सम्भवस्थलाभिप्रायेण। एवं साधारणाद्यन्यतमत्वम् अनैकान्तिकत्वम् ॥ ७१ ॥

आद्य साधारण इत्यादि। साधारणः साध्यवदन्यवृत्तिर्हेतु। तेन च व्याप्तिग्रहप्रतिबन्धः क्रियते। असाधारणः साध्यासमानाधिकरणो हेतु। तेन साध्यसामानाधिकरण्यग्रहः प्रतिबध्यते। यथा शब्दो नित्यः शब्दत्वादित्यादौ न साधारण्यम्। शब्दोऽनित्यः शब्दत्वादित्यादौ असाधारण्यञ्च। अन्ये तु सपक्षावृत्तिरसाधारणः। सपक्षश्च निश्चितसाध्यवान्। इत्थञ्च शब्दोऽनित्य शब्दत्वादित्यादौ पक्षे यदा साध्यनिश्चयस्तदा नासाधारण्यं तत्र हेतुनिश्चयादिति वदन्ति। अनुपसंहारी च अत्यन्ताभावाप्रतियोगिसाध्यकादि। तेन च व्यतिरेकव्याप्तिग्रहप्रतिबन्धः क्रियते। विरुद्धस्तु साध्यव्यापकीभूताभावप्रतियोगी। अयञ्च साध्याभावग्रहसामग्रीत्वेन प्रतिबन्धकः। सत्प्रतिपक्षे तु प्रतिहेतुः साध्याभावसाधकः। अत्र तु हेतुरेवेति विशेषः। साध्याभावसाधक एव साध्यसाधकत्वेन उपन्यस्त इत्यनयोर्विशेषोऽवगन्तव्य [illegible]। [illegible]

त्वाभावात् [illegible] । [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] इत्यत्ते । यत्र च [illegible] [illegible]नुमितिप्रतिबन्धकत्वम् । यत्र [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] जायते । यथा च [illegible] [illegible] [illegible] [illegible] [illegible] इति [illegible] एव कोटिद्वयव्याप्यवत्तादर्शने कोटिद्वयप्रकारक[illegible] संश भवति तथा सत्प्रतिपक्षस्थले संशयरूपानुमितिर्न[illegible] यत्र चैककोटिव्याप्यदर्शनं तत्रापि [illegible] [illegible] भानप्रतिबन्धात् संशयः । फलबलेन चाधिकसंशय[illegible] कल्पात इति यदुक्तम् । तन्न । तदभावव्याप्यवत्ताज्ञा सति तदुपनीतभानविशेषशाब्दबोधादेरनुदयात् । लौकिक सन्निकर्षाजन्यदोषाविशेषजन्यज्ञानमात्रे तस्य प्रतिबन्ध कता । लाघवात् । न तूपनीतभानविशेषे शाब्दबोधे च पृथक्प्रतिबन्धकता । गौरवात् । तथा च प्रतिबन्धक सत्त्वात् कथमनुमितिः । न हि लौकिकसन्निकर्षाज प्रत्यक्षमिव सत्प्रतिपक्षस्थले संशयानुमिति प्रामाणिकी येनानुमितिभिन्नत्वेनापि विशेषणीयं यत्र कोटिद्वयव्या प्यवत्ताज्ञानं तत्रोभयत्राप्रामाण्यज्ञानात् संशयो नान्यथा ऽगृहीताप्रामाण्यकस्यैव विरोधिज्ञानस्य प्रतिबन्धकत्वा दिति ।

आश्रयासिद्धाद्यन्यतमत्वमसिद्धत्वम् । आश्रयासिद्धि पक्षे पक्षतावच्छेदकस्याभाव । यत्र च काञ्चनमय. पर्वतो

वह्निमानिति साध्यते तत्र पर्वतो न काञ्चनमय इति ज्ञाने विद्यमाने काञ्चनमयपर्वते परामर्शप्रतिबन्धः फलम्।

स्वरूपासिद्धिस्तु पक्षे व्याप्यत्वाभिमतस्याभावः। अत्र च ह्रदो द्रव्यं धूमादित्यादौ पक्षे व्याप्यत्वाभिमतस्य हेतोरभावे ज्ञाते पक्षे साध्यव्याप्यहेतुमत्ताज्ञानरूपपरामर्शप्रतिबन्धः फलम्।

साध्याप्रसिद्धिरपि व्याप्यत्वासिद्धिः सा साध्ये साध्यतावच्छेदकाभावः। तथा च काञ्चनमयवह्निमानित्यादौ साध्ये साध्यतावच्छेदकाभावे ज्ञाते साध्यतावच्छेदकविशिष्टसाध्यव्याप्यवत्ताज्ञानरूपपरामर्शप्रतिबन्धः फलम्।

एवं हेतौ हेतुतावच्छेदकाभावः साधनाप्रसिद्धिः। यथा च काञ्चनमयधूमादित्यादौ हेतुतावच्छेदकविशिष्टहेतोर्ज्ञानाभावात् तत्तद्धेतुकव्याप्तिज्ञानादेरभावः फलम्। एवं वह्निमान् नीलधूमादित्यादौ गुरुतया नीलधूमत्वं हेतुतानवच्छेदकमिति व्याप्यत्वासिद्धिरित्यपि वदन्ति।

बाधस्तु पक्षे साध्याभावादिः। एतस्यानुमितिप्रतिबन्धः फलम्। तद्धर्मिकतदभावनिश्चयो लौकिकसन्निकर्षाजन्यदोषविशेषाजन्यतद्धर्मिकतज्ज्ञानमात्रे विरोधीति न नु तत्र सत्यसाधारण पक्षे साध्यसत्त्वज्ञानमनुमितिकारण तद्विरोधितया बाधसत्प्रतिपक्षयोर्हेत्वाभासत्वमिति चेन्न। [illegible] [illegible]

[illegible]

[illegible]

मेदात्। किञ्च यदा पक्षमात्र[illegible]
चारज्ञानादेः किञ्चित्करत्वात् [illegible]
वाच्यम्। न च यत्कालावच्छेदेन घटादौ गन्धाभाव
पृथिवीत्वज्ञानं तत्र तादृश्येव प्रतिबन्धकत्वं वाच्यम्। [illegible]
घटे गन्धवत्त्वात् कथं बाध इति वाच्यम्। एतत्कालावच्छे
देशकालावच्छेदेनानुमितिरनुभवसिद्धेति। सत्प्रति
तद्व्याप्यभिन्नो यो यो हेत्वाभासव्याप्यः स तस्य एव
भवति। अन्यथा हेत्वाभासाविभाजनात् बाध
सत्प्रतिपक्षभिन्न एव। अनन्तरं मुनिना पृथगुपाद
नात्। सत्प्रतिपक्षव्याप्यस्तु न प्रतिबन्धक इति प्रकटि
ऽयं। ॥ ७२ ॥

सपक्षे विपक्षे च भवेत् साधारणस्तु स इति
पक्षविपक्षवृत्तिः साधारण इत्यर्थः। सपक्षः साध्यवान्
विपक्षः साध्याभाववान् विरुद्धवारणाय सपक्षवृत्तित्वमुक्तं
वस्तुतो विपक्षवृत्तित्वमेव वाच्यम्। विरुद्धस्य साधारणत्वेऽपि
दूषकताबीजस्य भिन्नतया तस्य पार्थक्यात्।

यस्तूभयस्माद् व्यावृत्तः स चासाधारणो मतः ॥७३

तथैवानुपसंहारी केवलान्वयिपक्षकः ।

यः साध्यवति नैवास्ति स विरुद्ध उदाहृतः ॥७४॥

आश्रयासिद्धिराद्या स्यात् स्वरूपासिद्धिरप्यथ।

व्याप्यत्वासिद्धिरपरा स्यादसिद्धिरतस्त्रिधा ॥ ७५॥

यः सपक्षे विपक्षे च भवेत् साधारणस्तु सः।

नाम। [illegible] [illegible]। [illegible]
[illegible] प्रतिबन्धकत्वात्। [illegible]
[illegible] [illegible] प्रतिबन्धकत्वात्। [illegible]
[illegible] प्रामाण्यज्ञान [illegible]। [illegible]
बाधस्थले पक्षे हेतुसत्त्वे व्यभिचारः पक्षे [illegible]
मिति[illegible] दोष इति वाच्यम्। [illegible]व्यभिचार[illegible]
भेदात्। किञ्च यत्र पक्षमात्र[illegible] [illegible]
चारज्ञानादेरकिञ्चित्करत्वात् बाधस्यानुमितिप्रतिबन्धकत्व
वाच्यम्। एवं यत्रोत्पत्तिक्षणावच्छिन्ने घटादौ गन्धवत्त्व-
पृथिवीत्वज्ञानं तत्र बाधस्यैव प्रतिबन्धकत्वं वाच्यम्। न च
घटे गन्धवत्त्वात् कथं बाध इति वाच्यम्। पक्षतावच्छेदक
देशकालानवच्छेदेनानुमितिरनुभवसिद्धत्वादिति। सत्प्रतिप-
तद्व्याप्यभिन्नो यो यो हेत्वाभासव्याप्यः स तत्स्थ एवान्त-
र्भवति। अन्यथा हेत्वाभासाधिक्यप्रसङ्गात्। बाधव्याप्य-
सत्प्रतिपक्षभिन्न एव। स्वतन्त्रेच्छेन मुनिना पृथगुपादा-
नात्। सत्प्रतिपक्षव्याप्यस्तु न प्रतिबन्धक इति प्रकटित-
ध्ये. । ७२ ॥

य सपक्षे विपक्षे च भवेत् साधारणस्तु स इति
सपक्षविपक्षवृत्तिः साधारण इत्यर्थः। सपक्षः साध्यवान्
विपक्षः साध्याभाववान् विरुद्धवारणाय सपक्षवृत्तित्वमुक्तम्।
वस्तुतो विपक्षवृत्तित्वमेव वाच्यम्। विरुद्धस्य साधारणत्वेऽपि
दूषकताबीजस्य भिन्नतया तस्य पार्थक्यात्।

वाक्यार्थस्यातिदेशस्य स्मृतिर्व्यापार उच्यते ।
गवयादिपदानान्तु शक्तिधीरुपमाफलम् ॥ ८० ॥
पदज्ञानन्तु करणं द्वारं तत्र पदार्थधीः ।

केनचिद् ग्रामीणं प्रति उक्तं गोसदृशो गवयपदवाच्य इति पश्चाद् ग्रामीणेन क्वचिदरण्ये गवयो दृष्टस्तत्र गोसादृश्यज्ञानं यत् तत् उपमितिकरणम् ॥ ७९ ।

तदनन्तरं गोसदृशो गवयपदवाच्य इत्यतिदेशवाक्यार्थस्मरणं जायते तदेव व्यापारः । तदनन्तरं तत्र गवयो गवयपदवाच्य इति ज्ञानं जायते तदुपमितिः । न त्वयं गवयपदवाच्य इत्युपमितिः । गवयान्तरे शक्तिग्रहाभावप्रसङ्गात् ॥ ८० ।

शाब्दबोधप्रकारं दर्शयति । पदज्ञानन्त्विति । न तु ज्ञायमानं पदं करणम् । पदाभावेऽपि मौनिश्लोकादौ शाब्दबोधात् । पदार्थधीरिति । पदजन्यपदार्थस्मरणं व्यापारः । अन्यथा पदज्ञानवतः प्रत्यक्षादिना पदार्थोपस्थितावपि शाब्दबोधापत्तेः । तत्रापि वृत्त्या पदजन्यत्वं बोध्यम् । अन्यथा घटादिपदात् समवायसम्बन्धेन आकाशस्मरणं जायते । आकाशस्यापि शाब्दबोधापत्तेः । वृत्तिश्च शक्तिलक्षणान्यतरः सम्बन्धः । अतएव शक्तिज्ञानस्योपयोगः पूर्वं शक्तिग्रहाभावे पदज्ञानेऽपि तत्सम्बन्धेन स्मरणानुत्पत्तेः । पदज्ञानस्य सम्बन्धिज्ञानविधयाऽर्थस्मारकत्वम् । शक्तिश्च पदेन सह पदार्थस्य सम्बन्धः । सा चास्मात्पदादयमर्थो बोद्धव्य इतीश्वरेच्छारूपा । आधुनिके नाम्नि शक्ति

पक्षासिद्धिर्यत्र पक्षो भवेन्मणिमयो गिरिः ।
ह्रदो द्रव्यं धूमवत्त्वादत्रासिद्धिरथापरा ॥ ७६ ॥
व्याप्यत्वासिद्धिरपरा नीलधूमादिके भवेत् ।
विरुद्धयोः परामर्शो हेत्वोः सत्प्रतिपक्षता ॥
साध्यशून्यो यत्र पक्षस्त्वसौ बाध उदाहृतः ।
उत्पत्तिकालीनघटे गन्धादिर्यत्र साध्यते । ७८
ग्रामीणस्य प्रवसतः पश्यतो गवयादिकम् ।
सादृश्यधीर्गवादीनां या स्यात् सा करणं मतम् ॥ ७९

पक्षासिद्धिरिति। आश्रयासिद्धिरित्यर्थः। नीलधूमादिक इति। नीलधूमत्वं गुरुतया न हेतुतावच्छेदकं समानाधिकरणव्याप्यतावच्छेदकधर्मान्तराघटितस्यैव व्याप्यतावच्छेदकत्वात्। धूमप्रागभावत्वसंग्रहाय समानाधिकरणेति ॥ ७६ ॥

विरुद्धयोरिति। कपिसंयोगतदभावव्याप्यवत्त्वपरामर्शेऽपि न सत्प्रतिपक्षत्वमत उक्तम्। विरुद्धयोरिति। तथा च स्वसाध्यविरुद्धसाध्याभावव्याप्यवत्तापरामर्शकालीनसाध्यव्याप्यवत्तापरामर्शविषय इत्यर्थः ॥ ७७ ॥

साध्यशून्य इति। पक्षः पक्षतावच्छेदकविशिष्ट इत्यर्थः तेन घटे गन्धसत्त्वेऽपि न क्षतिः। एवं मूलावच्छिन्ने वृक्षे कपिसंयोगोत्पत्तावपि बोध्यम् ॥ ७८ ॥

उपमितिं व्युत्पादयति। ग्रामीणस्येति। यत्रारण्यकेन

वाक्यार्थस्यातिदेशस्य स्मृतिर्व्यापार उच्यते।
गवयादिपदानान्तु शक्तिधीरुपमाफलम् ॥ ८० ॥
पदज्ञानन्तु करणं द्वारं तत्र पदार्थधीः।

केनचित् ग्रामीण प्रति उक्तं गोसदृशो गवयपदवाच्य इति पश्चाच्च ग्रामीणेन क्वचिदरण्ये गवयो दृष्टस्तत्र गोसादृश्यज्ञानं यत् तत् उपमितिकरणम् ॥ ७९ ॥

तदनन्तरं गोसदृशो गवयपदवाच्य इत्यतिदेशवाक्यार्थस्मरणं जायते तदेव व्यापारः। तदनन्तरं तत्र गवयो गवयपदवाच्य इति ज्ञानं जायते तदुपमिति। न त्वयं गवयपदवाच्य इत्युपमितिः। गवयान्तरे शक्तिग्रहाभावप्रसङ्गात् ॥ ८० ॥

शाब्दबोधप्रकारं दर्शयति। पदज्ञानन्त्विति। न तु ज्ञायमानं पदं करणम्। पदाभावेऽपि मौनिश्लोकादौ शाब्दबोधात्। पदार्थधीरिति। पदजन्यपदार्थस्मरणं व्यापारः। अन्यथा पदज्ञानवतः प्रत्यक्षादिना पदार्थोपस्थितावपि शाब्दबोधापत्तेः। तत्रापि वृत्त्या पदजन्यत्वं बोध्यम्। अन्यथा घटादिपदात् समवायसम्बन्धेन आकाशस्मरणं जायते। आकाशस्यापि शाब्दबोधापत्तेः। वृत्तिश्च शक्तिलक्षणान्यतरः सम्बन्धः। अतएव शक्तिज्ञानस्योपयोगः। एवं शक्तिग्रहाभावे पदज्ञानेऽपि तत्सम्बन्धेन स्मरणानुपपत्तेः। पदज्ञानस्य सन्निधिज्ञानविधयाऽर्थोपकारकत्वम्। शक्तिश्च पदेन सह पदार्थस्य सम्बन्धः। सा चास्मात्पदादयमर्थो बोद्धव्य इतीश्वरेच्छारूपा। आधुनिके नाम्नि शक्ति

शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी ॥८॥

रस्त्येव । एकादशेऽहनि पिता नाम कुर्य्यात् इतीश्वरेच्छायाः सत्त्वात् । आधुनिके तु सङ्केते न शक्तिरिति सम्प्रदायः । नव्यास्तु ईश्वरेच्छा न शक्तिः किन्तु इच्छैव । तेन आधुनिकसङ्केतेऽपि शक्तिरस्तीति वदन्ति । शक्तिग्रहश्च व्याकरणादितः । तथा हि ।

शक्तिग्रहं व्याकरणोपमानकोषाप्तवाक्यात् व्यवहारतश्च ।
वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः ॥

धातुप्रकृतिप्रत्ययादीनां शक्तिग्रहो व्याकरणाद्भवति । क्वचित् तु सति बाधके त्यज्यतेऽपि । यथा वैयाकरणैराख्यातस्य कर्त्तरि शक्तिरुच्यते । चैत्रः पचतीत्यादौ कर्त्तुश्चैत्रस्याभेदान्वयः । तत्र गौरवान्न जन्यते किन्तु कृतौ शक्तिग्रहो लाघवात् । कृतिश्चैत्रादौ प्रकारीभूय भासते । न च कर्त्तुरनभिधानाच्चैत्रादिपदानन्तरं तृतीया स्यादिति वाच्यम् कर्त्तृसंख्यानभिधानस्य तत्र तन्त्रत्वात् संख्याभिधानयोग्यः कर्म्मत्वाद्यनवरुद्धः प्रथमान्तपदोपस्थाप्यः कर्म्मत्वादीतरविशेषणत्वतात्पर्य्याविषयत्वमर्थः । तेन चैत्र इव गच्छतीत्यादौ न चैत्रे संख्यान्वयः । यत्र कर्म्मादौ न विशेषणत्वतात्पर्य्यं तद्वारणाय प्रथमान्तेति । यद्वा धात्वर्थातिरिक्तविशेषणत्वं प्रथमदलार्थः । तेन चैत्र इव गच्छतीत्यत्र चैत्रादेर्वारणम् । स्तोकं पचतीत्यादौ स्तोकादेर्वारणाय च द्वितीयदलम् । तस्य द्वितीयान्तोपस्थाप्यत्वाद्वारणम् । एवं व्यापारेऽपि न शक्तिर्गौरवात् । रथो गच्छतीत्यादौ स्वव्यापारे

आश्रयत्वे वा लक्षणा। ज्ञानातीत्यादौ तु आश्रयत्वे नश्यतीत्यादौ प्रतियोगित्वे निरूढलक्षणा। उपमानाद्यथा शक्तिग्रहस्तथोक्तम्।

एवं कोषादपि शक्तिग्रहः। सति बाधके क्वचित् त्यज्यते। यथा नीलादिपदानां नीलरूपादौ नीलादिविशिष्टे च शक्तिः कोषेण व्युत्पादिता तथापि लाघवात् नीलादौ शक्तिः। नीलादिविशिष्टे लक्षणेति।

एवमाप्तवाक्यादपि। यथा कोकिलः पिकपदवाच्य इत्यादिशब्दात् पिकादिशक्तिग्रहः।

एवं व्यवहारादपि। यथा प्रयोजकवृद्धेन घटमानयेत्युक्तम्। तत् श्रुत्वा प्रयोज्यवृद्धेन घट आनीतः। तदवधार्य पार्श्वस्थो बालो घटानयनरूपं कार्यं घटमानयेति शब्दप्रयोज्यमवधारयति। ततश्च घटमपसारय गामानय इत्यादौ आवापोद्वापाभ्यां घटादिपदानां कार्यान्वितघटादौ शक्तिं गृह्णाति। इत्थञ्च भूतले नीलो घट इत्यादिशब्दान्न शाब्दबोधः। घटादिपदानां कार्यान्वितघटादिबोधे सामर्थ्यावधारणात्। कार्यताबोधं प्रति च लिङादीनां सामर्थ्यात् तदभावाच्च शाब्दबोध इत्यपि केचित्। तन्न। प्रथमतः कार्यान्वितघटादौ शक्त्यवधारणेऽपि लाघवेन पश्चात्तस्य परित्यागौचित्यात्। अत एव चैत्र पुत्रस्ते जातः कन्या ते गर्भिणी जाता इत्यादौ मुखप्रसादमुकुलनादिलिङ्गेन हर्षशोकौ अनुमाय तत्कारणत्वेन परिशेषात् शाब्दबोधं निर्णीय तद्धेतुतया तत्पदान्यवधारयति तथा [illegible] कार्यान्विते न शक्ति [illegible] इति [illegible]-

आश्रयत्वे वा लक्षणा। जानातीत्यादौ तु आश्रयत्वे नश्यतीत्यादौ प्रतियोगित्वे निरूढलक्षणा। उपमानाद्यथा शक्तिग्रहस्तथोक्तम्।

एवं कोषादपि शक्तिग्रहः। सति बाधके क्वचित् त्यज्यते। यथा नीलादिपदानां नीलरूपादौ नीलादिविशिष्टे च शक्तिः कोषे च व्युत्पादिता तथापि लाघवात् नीलादौ शक्तिः। नीलादिविशिष्टे लक्षणेति।

एवमाप्तवाक्यादपि। यथा कोकिलः पिकपदवाच्य इत्यादिशब्दात् पिकादिशक्तिग्रहः।

एवं व्यवहारादपि। यथा प्रयोजकवृद्धेन घटमानयेत्युक्तम्। तत् श्रुत्वा प्रयोज्यवृद्धेन घट आनीतः। तदवधार्य्य पार्श्वस्थो बालो घटानयनरूपं कार्य्यं घटमानयेति शब्दप्रयोज्यमवधारयति। ततश्च घटमपसारय गामानय इत्यादौ आवापोद्वापाभ्यां घटादिपदानां कार्य्यान्वितघटादौ शक्तिं गृह्णाति। इत्यञ्च भूतले नीलो घट इत्यादिशब्दान्न शाब्दबोधः। घटादिपदानां कार्य्यान्वितघटादिबोधे सामर्थ्यावधारणात्। कार्य्यताबोधं प्रति च लिङादीनां सामर्थ्यात् तदभावाच्च शाब्दबोध इत्यपि केचित्। तन्न। प्रथमतः कार्य्यान्वितघटादौ शक्त्यवधारणेऽपि लाघवेन पश्चात्तस्य परित्यागौचित्यात्। अत एव चैत्र पुत्रस्ते जातः कन्या ते गर्भिणी जाता इत्यादौ मुखप्रसादमुखमालिन्याभ्यां सुखदुःखे अनुमाय तत्कारणत्वेन परिशेषात् शाब्दबोधं निर्णीय तद्धेतुतया तं शब्दमवधारयति। तथा च व्यभिचारात् कार्य्यान्विते न शक्तिः न च तत्र ते पश्चे-

एव शक्तेः स्वीकारात्। न चाननुगमः। गोत्वादेरेवानुगमकत्वात्। किञ्च गौ शक्येति शक्तिग्रहो यदि तदा व्यक्तौ शक्तिः। यदि तु गोत्वं शक्यमिति शक्तिग्रहस्तदा गोत्वप्रकारकपदार्थस्मरणं शाब्दबोधश्च न स्यात्। समानप्रकारत्वेन शक्तिज्ञानस्य पदार्थस्मरणं शाब्दबोधं प्रति च हेतुत्वात्। किञ्च गोत्वे यदि शक्तिस्तदा गोत्वत्वं शक्यतावच्छेदकं वाच्यम्। गोत्वन्तु गवेतरासमवेतत्वे सति सकलगोसमवेतत्वम्। तथा च गोव्यक्तीनां शक्यतावच्छेदकेऽनुप्रवेशात् तवैव गौरवम्। तस्मात तत्तज्जात्याकृतिविशिष्टतत्तद्व्यक्तिबोधानुपपत्त्या कल्प्यमाना शक्तिर्जात्याकृतिविशिष्टव्यक्तौ विश्राम्यतीति।

शब्दं पदन्तु क्वचिद्यौगिकं क्वचिद्रूढं क्वचिद्योगरूढं क्वचिद्यौगिकरूढम्। यत्रावयवार्थ एव बुध्यते तद्यौगिकम्। यथा पाचकादिपदम्।

यत्रावयवशक्तिनैरपेक्ष्येण समुदायशक्तिमात्रेण बुध्यते तद्रूढम्। यथा गोपदघटादिपदम्।

यत्र तु अवयवशक्तिविषये समुदायशक्तिरप्यस्ति तद्योगरूढम्। यथा पङ्कजादिपदम्। तथा हि पङ्कजपदमवयवशक्त्या पङ्कजनिकर्तृरूपमर्थं बोधयति। समुदायशक्त्या च पद्मत्वेन रूपेण पद्मं बोधयति। न च केवलावयवशक्त्या कुमुदे प्रयोगः स्यादिति वाच्यम्। रूढिज्ञानस्य केवलयौगिकार्थज्ञानप्रतिबन्धकत्वादिति प्राञ्चः।

वस्तुतस्तु समुदायशक्त्योपस्थितपद्मेऽवयवार्थपङ्कजनिकर्तुरन्वयो भवति। सान्निध्यात्। यत्र रूढ्यर्थस्य बाध,

आसत्तियोग्यताकाङ्क्षातात्पर्य्यज्ञानमिष्यते ॥ ८२॥

यदि चान्वयानुपपत्तिर्लक्षणाबीजं स्यात् तदा क्वचिद्गङ्गा-पदस्य तीरे क्वचिद् घोषपदस्य मत्स्यादौ लक्षणेति नियमो न स्यात्। इदन्तु बोध्यं शक्यार्थसम्बन्धो यदि तीरत्वेन रूपेण गृहीतस्तदा तीरत्वेन तीरबोधः। यदि तु गङ्गातीरत्वेन रूपेण गृहीतस्तदा तेनैव रूपेण स्मरणम्। अत एव लक्ष्य-तावच्छेदके न लक्षणा। तत्प्रकारकबोधस्य तत्र लक्षणां विनाप्युपपत्तेः। परन्तु एवंक्रमेण शक्यतावच्छेदकेऽपि शक्तिर्न स्यात्। तत्प्रकारकशब्दार्थस्मरणं प्रति तत्पदस्य सामर्थ्यमित्यस्य सुवचत्वादिति विभावनीयम्।

यत्र तु शक्यार्थस्य स्वान्वयपदवाच्यत्वरूपा लक्षणा सा लक्षितलक्षणेत्युच्यते। यथा द्विरेफादिपदे रेफद्वयसम्बन्धो भ्रमरपदे ज्ञायते। भ्रमरपदस्य च सम्बन्धो भ्रमरे ज्ञायते। तत्र लक्षितलक्षणा। किन्तु लाक्षणिकं पदं नानुभावि-कम्। लाक्षणिकार्थस्य शाब्दबोधे तु पदान्तरं कारणम्। शक्तिलक्षणान्यतर-सम्बन्धेनेतरपदार्थान्वित-स्वशक्यार्थशाब्दबोधं प्रति पदानां सामर्थ्यावधारणादिति प्राञ्चः। नवीनास्तु तदप्यनुभावकमेव। पदं गौणमिति तु द्वारम्। अन्यथा तुल्ययुक्त्या शक्तस्यापि पदस्याननुभावकत्वापत्तेरित्याहुः। वाक्ये तु शक्तेरभावाच्छक्यसम्बन्धरूपा लक्षणाऽपि नास्ति। यत्र गभीरायां नद्यां घोष इत्युक्तं तत्र नदीपदस्य नदीतीरे लक्षणा। गभीरपदार्थस्य नद्या सहाभेदेनान्वयः। क्वचि-देकदेशान्वयस्य स्वीकृतत्वात्। यदि तत्रैकदेशान्वयोऽपि न

भेदे घटाविति विग्रहोत्पत्त्यादिदर्शनात्। साहित्यस्याननुभ-वाच्च तस्मात् साहित्यादिकं नार्थः। अत एव राजपुरो-हितौ सायन्यकालौ दक्षेदानामित्यत्र लक्षणाभावात् द्वन्द्व-नापद्यते। किन्तु वास्तवो भेदो यत्र तत्र द्वन्द्वः। न च नीलघटयोरभेद इत्यादौ कथमिति वाच्यम्। तत्र नील-पदस्य नीलत्वं घटपदस्य घटत्वमर्थः। अभेद इत्यस्या-न्वयाभेद इत्यर्थात्।

समाहारद्वन्द्वे तु यदि समाहारोऽप्यनुभूयत इत्युच्यते तदाऽहिनकुलमित्यादौ परपदेऽहिनकुलसमाहारे लक्षणा। पूर्वपदं तात्पर्यग्राहकम्। न च भेरीमृदङ्गं वादयेत्यत्र कथं समाहारस्यान्वयः अपेक्षाबुद्धिविशेषरूपस्य वादना-न्वयादिति वाच्यम्। स्वाश्रयवृत्तित्वरूपसम्बन्धेन तद-न्वयात्। एवं पञ्चमूलीत्यादावपि। परे तु अहिनकुल-मित्यादौ अहिनकुलत्वं बुध्यते। प्रत्येकमेकत्वान्वयः। समा-हारसंज्ञा च यत्र एकत्वं नपुंसकत्वं प्राणितूर्येत्यादिसूत्रे-णेह तत्रैव द्वन्द्वैकवचनसमाविति वदन्ति।

कर्मधारयस्थले तु नीलोत्पलमित्यादौ अभेदसम्बन्धेन नीलपदार्थ उत्पलपदार्थे प्रकारः। तत्र न च लक्षणा। अत एव निषादस्थपतिं याजयेदित्यत्र न तत्पुरुषः। लक्षणापत्तेः। किन्तु कर्मधारयो लक्षणाभावात्। न च निषा-दस्य शूद्रजातिविशेषस्य वेदानधिकारात् याजनानर्ह इति वाच्यम्। निषादस्य विद्याप्रयुक्तेरेव कल्पनात्। लाघवेन दृष्टार्थस्यान्वये तदनुपपत्त्या कल्पनायाः फल-मुखगौरवतयाऽदोषत्वादिति। तस्मात् अर्धपिप्पली-

कर्म्मतांविनान्वयबोधरूपः शाब्दोबोधो भवतीति केचित्। अपरे तु।

यद्यदाकाङ्क्षितं योग्यं सन्निधानं प्रपद्यते।

तेन तेनान्वितः स्वार्थः पदैरेवावगम्यते।

तथा च खण्डवाक्यार्थबोधानन्तरं तथैव पदार्थस्मृत्या महावाक्यार्थबोध इत्याहुः। एतेन तावद्वर्णाभिव्यङ्ग्य पदस्फोटोऽपि निरस्तः। तत्तद्वर्णसंस्कारसहितान्त्यवर्णोपलम्भेन तद्व्यञ्जकेनैवोपपत्तेरिति। इदन्तु बोध्यम्। यत्र द्वारमित्यत्र पिधेहीति पदस्य ज्ञानादेव बोधः। न तु पिधानादिरूपार्थज्ञानात्। पदजन्यपदार्थोपस्थितेश्शाब्दबोधे हेतुत्वात्। किञ्च क्रियाकर्म्मपदानां [illegible] साकाङ्क्षत्वम्। तेन क्रियापदं विना [illegible] स्यात्। तथा पुष्पेभ्य इत्यादौ स्पृहयतीति पदाध्याहारं विना चतुर्थ्यनुपपत्तेः पदाध्याहार [illegible]।

[illegible]

कारणं सन्निधानन्तु पदस्यासत्तिरुच्यते ।
पदार्थे तत्र तद्वत्ता योग्यता परिकीर्त्तिता ॥ ८३॥

त्यादौ परपदे तत्सम्बन्धिनि लक्षणा पूर्वपदार्थप्रधानतया चान्वयबोध इति। इत्यञ्च समासे न क्वापि शक्तिः। पदशक्त्यैव निर्वाहादिति। पितरौ श्वशुरौ इत्यादौ पितृपदे जनकदम्पत्योः श्वशुरपदे स्त्रीजनकदम्पत्योर्लक्षणा। एवमन्यत्रापि। घटा इत्यादौ न लक्षणा। घटत्वेन रूपेण नानाघटस्थितिसम्भवात्।

आसत्तिर्योग्यतेत्यादि। आसत्तिज्ञानं योग्यताज्ञानम्। आकाङ्क्षाज्ञानं तात्पर्य्यज्ञानञ्च शाब्दबोधे कारणम् ॥ ८२ ॥

तत्रासत्तिपदार्थमाह। सन्निधानन्त्विति। यत्पदार्थस्य यत्पदार्थेनान्वयोऽपेक्षितस्तयोरव्यवधानेनोपस्थिति कारणम्। तेन गिरिर्भुक्तमग्निमान् देवदत्तेनेत्यादौ न शाब्दबोधः। नीलो घटो द्रव्य पट इत्यादावासत्तिभ्रमाच्छाब्दबोध। आसत्तिभ्रमाच्छाब्दभ्रमाभावेऽपि न क्षतिः। ननु यत्र छत्री कुण्डली वासस्वी देवदत्त इत्युक्तं तत्रोत्तरपदस्मरणेन पूर्वपदस्मरणस्य नाशात्। अव्यवधानेन उत्तरपदस्मरणासम्भव इति चेन्न। प्रत्येकपदसंस्कारैश्चरम तावद्विषयकस्मरणस्याव्यवधानेनोत्पत्तेः। नानासन्निकर्षैरेकप्रत्यक्षस्येव नानासंस्कारैरेकस्मरणोत्पत्तेरपि सम्भवात्। तावत्पदसंस्कारसहितचरमवर्णज्ञानस्योद्बोधकत्वात्। कथमन्यथा नानावर्णैकपदस्मरणम्। परन्तु तावत्पदार्थानां स्मरणादेकदैव खले कपोतन्यायात् तावत्पदार्थाना क्रिया-

कर्म्मभावेनान्वयबोधरूपः शाब्दोबोधो भवतीति केचित्। अपरे तु।

यद्यदाकाङ्क्षितं योग्यं सन्निधानं प्रपद्यते।

तेन तेनान्वितः स्वार्थः पदैरेवावगम्यते॥

तथा च खण्डवाक्यार्थबोधानन्तरं तथैव पदार्थस्मृत्या महावाक्यार्थबोध इत्यप्याहुः। एतेन तावद्वर्णाभिव्यङ्ग्यः पदस्फोटोऽपि निरस्तः। तत्तद्वर्णसंस्कारसहितचरमवर्णोपलम्भेन तद्व्यञ्जकेनैवोपपत्तेरिति। इदन्तु बोध्यम्। यत्र द्वारमित्युक्तं तत्र पिधेहीति पदस्य ज्ञानादेव बोधः। न तु पिधानादिरूपार्थज्ञानात्। पदजन्यपदार्थोपस्थितेस्तच्छाब्दबोधे हेतुत्वात्। किञ्च क्रियाकर्म्मपदाना तेन तेनैव सह साकाङ्क्षत्वम्। तेन क्रियापद विना कथ शाब्दबोध· स्यात्। तथा पुष्पेभ्य इत्यादौ स्पृहयतीति पदाध्याहारं विना चतुर्थ्यनुपपत्ते पदाध्याहार आवश्यक·।

योग्यता निर्वक्ति। पदार्थे इत्यादिना। एकपदार्थेऽपरपदार्थसम्बन्धो योग्यतेत्यर्थः। तज्ज्ञानाभावाच्च वह्निना सिञ्चतीत्यादौ न शाब्दबोधः। नन्वेतस्या योग्यताया ज्ञानं शाब्दबोधात् प्राक् सर्वत्र न सम्भवति वाक्यार्थपूर्वत्वादिति चेन्न। तत्तत्पदार्थस्मरणे सति क्वचित् संशयरूपस्य क्वचिन्निश्चयरूपस्यापि योग्यताया ज्ञानस्य सम्भवात्।

नव्यास्तु योग्यताया ज्ञान न शाब्दज्ञाने कारणम्। वह्निना सिञ्चतीत्यादौ सेके वह्निकरणत्वाभावरूपायोग्यतानिश्चयेन प्रतिबन्धात् न शाब्दबोधः। तदभावनिश्चयस्य लौकिकसन्निकर्षाजन्यदोषविशेषाजन्यज्ञानमात्रे प्रतिबन्ध-

कर्म्मभावेनान्वयबोधरूपः शाब्दोबोधो भवतीति केचित्। अपरे तु।

यद्यदाकाङ्क्षितं योग्यं सन्निधानं प्रपद्यते।

तेन तेनान्वितः स्वार्थः पदैरेवावगम्यते।

तथा च खण्डवाक्यार्थबोधानन्तरं तथैव पदार्थस्मृत्या महावाक्यार्थबोध इत्याहुः। एतेन तावद्वर्णाभिव्यङ्ग्यः पदस्फोटोऽपि निरस्तः। तत्तद्वर्णसंस्कारसहितचरमवर्णोपलम्भेन तद्व्यञ्जकेनैवोपपत्तेरिति। इदन्तु बोध्यम्। यत्र द्वारमित्युक्तं तत्र पिधेहीति पदस्य ज्ञानादेव बोधः। न तु पिधानादिरूपार्थज्ञानात्। पदजन्यपदार्थोपस्थितेस्तत्राप्यबोधे हेतुत्वात्। किञ्च क्रियाकर्म्मपदानां तेन तेनैव सह साकाङ्क्षत्वम्। तेन क्रियापदं विना कारकपदं न शाब्दबोधः स्यात्। तथा पुष्पेभ्य इत्यादौ स्पृहयतीति पदाध्याहारं विना चतुर्थ्यनुपपत्तेः पदाध्याहार आवश्यक इति।

आसत्तिं निरूपयति। पदार्थ [illegible]

[illegible]

[illegible] प्राक् [illegible]

[illegible]

यत्पदेन विना यस्यानन्वयभावकता भवेत् ।

कत्वात् शाब्दबोधं प्रति प्रतिबन्धकत्वं सिद्धम्। योग्यताज्ञानविलम्बाच्च शाब्दबोधविलम्बोऽसिद्ध इति वदन्ति ॥ ८३॥

आकाङ्क्षां निर्वक्ति । यत्पदेनेत्यादि । येन पदेन विना यत्पदस्य अन्वयाननुभावकत्वं तेन सह तस्याकाङ्क्षा इत्यर्थः । क्रियापदं विना कारकपदं नान्वयबोधं जनयतीति तेन तस्याकाङ्क्षा । वस्तुतस्तु क्रियाकारकपदानां सन्निधानसामर्थ्यात् चरितार्थम् । परन्तु घटकर्मताबोधं प्रति घटपदोत्तरद्वितीयाकाङ्क्षाज्ञानं कारणम् । तेन घटकर्मत्वमानयन कृतिरित्यादौ न शाब्दबोधः । अयमेति पुत्रो राज्ञः पुरुषोऽपसार्य्यताम् इत्यादौ तु पुरुषेण सह राजपदस्य तात्पर्य्यग्रहाभावात् न तेन सहान्वयः ।

तात्पर्य्यं निर्वक्ति वक्तुरिच्छेति । यदि तात्पर्य्यज्ञानं कारणं न स्यात् तदा सैन्धवमानयेत्यादौ क्वचिदश्वस्य क्वचिल्लवणस्य बोधो न स्यात् । न च तात्पर्य्यग्राहकप्रकरणादीनामेव शाब्दबोधे कारणत्वमस्त्विति वाच्यम् तेषामननुगमात् । तात्पर्य्यज्ञानजनकत्वेन तेषामनुगमे तु तात्पर्य्यज्ञानमेव लाघवात् कारणमस्तु इत्थञ्च वेदस्थलेऽपि तात्पर्य्यज्ञानार्थमीश्वरः कल्प्यते । न च तत्राध्यापकतात्पर्य्यज्ञानं कारणमिति वाच्यम् सर्गादावध्यापकाभावात् । न च प्रलय एव नास्तीति । कुतः सर्गादिरिति वाच्यम् प्रलयस्यागमप्रतिपाद्यत्वात् । इत्थञ्च शुकवाक्येऽपि ईश्वरीयतात्पर्य्यज्ञानं कारणम् । विसंवादिशुकवाक्ये तु शिक्षयितुरेव तात्पर्य्यस्य

आकाङ्क्षा वक्तुरिच्छा तु
तात्पर्य्यं परिकीर्त्तितम् ॥ ८४ ॥

ज्ञान कारणम्। अन्ये तु नानार्थादौ क्वचिदेव तात्पर्य्यं ज्ञानं कारणम्। तथा च शुकवाक्ये विनैव तात्पर्य्यज्ञान माब्दबोधः। वेदे तु अनादिमीमांसापरिशोधिततर्कैरर्थावधारणमित्याहुः।

पूर्वमनुभवस्मरणभेदात् बुद्धेर्द्वैविध्यमुक्तम्। तत्रानुभवप्रकारा दर्शिता सुगमतया स्मरणं न दर्शितम्। तत्र हि पूर्वानुभवः कारणम्। अत्र केचित् अनुभवत्वेन न कारणत्व किन्तु ज्ञानत्वेन। अन्यथा स्मरणानन्तरं स्मरणं न स्यात् समानप्रकारकस्मरणेन पूर्वसंस्कारस्य विनष्टत्वात्। मन्मते तु तेनैव स्मरणेन संस्कारान्तरद्वारा स्मरणान्तरं जन्यत इत्याहुस्तन्न। यत्र समूहालम्बनोत्तर घटपटादीना क्रमेण स्मरणमजनिष्ट सकलविषयकस्मरणन्तु मा भूत् तत्र फलस्य संस्कारनाशकत्वाभावात् कालस्य रोगस्य चरमफलस्य वा संस्कारनाशकत्व वाच्यम्। तथा च न क्रमिकस्मरणानुपपत्तिः। न च पुनः पुनः स्मरणात् दृढतरसंस्कारानुपपत्ति झटित्युद्‌बोधकसमवधानस्य दार्ढ्यपदार्थत्वात्। न च वनिगमनाविरहादेव ज्ञानत्वेनापि जनकत्व स्यादिति वाच्यम् विशेषधर्मेणाव्यभिचारात् ज्ञाने सामान्यधर्मेणान्यथासिद्धत्वात्। कथमन्यथा दण्डस्य भ्रमिद्वारा द्रव्यत्वेन रूपेण न कारणत्वम्। न चान्तरालिकस्मरणाना संस्कारनाशकत्वसंशयात् व्यभिचारसंशय इति वाच्यम्। अनन्त-

आकाङ्क्षा वक्तुरिच्छा तु
तात्पर्य्यं परिकीर्त्तितम् ॥ ८४ ॥

ज्ञानं कारणम्। अन्ये तु नानार्थादौ क्वचिदेव तात्पर्य्य-ज्ञानं कारणम्। तथा च शुकवाक्ये विनैव तात्पर्य्यज्ञानं शाब्दबोधः। वेदे तु अनादिमीमांसापरिशोधिततर्कैरर्था-वधारणमित्याहुः।

पूर्व्वमनुभवस्मरणभेदात् बुद्धेर्द्वैविध्यमुक्तम्। तत्रानुभव-प्रकारा दर्शिताः स्मृतिस्तया स्मरणं न दर्शितम्। तत्र हि पूर्व्वानुभवः कारणम्। अत्र केचित् अनुभवत्वेन न कारणत्वं किन्तु ज्ञानत्वेन। अन्यथा अनुभवानन्तरं स्मरणं न स्यात् समानप्रकारकस्मरणेन पूर्व्वसंस्कारस्य विनष्टत्वात्। स्मृतिस्तु नैव स्मरणेन संस्कारान्तरद्वारा स्मरणान्तरं जन्यत इत्याहुस्तन्न। यत्र समूहालम्बनेनैव घटपटादीनां क्रमिक-स्मरणमिति तत्र विनिगमकाभावात् मा भूत् तत्र फलस्य संस्कारनाशकत्वाभावात् कालस्य रोगस्य चरमफलस्य वा संस्कारनाशकत्वं वाच्यम्। तथा च न संस्कारनाशानुप-पत्तिः। न च पुनः पुनः स्मरणात् दृढतरसंस्कारानुत्पत्ति-[illegible]

[illegible]

यत्पदेन विना यस्यानतुभावकता भवेत्।

कत्वात् शाब्दबोधं प्रति प्रतिबन्धकत्वं मिदम्, योग्यता-
ज्ञानविलम्बाच्च शाब्दबोधविलम्बोऽसिद्ध इति वदन्ति ॥ ८३॥

आकाङ्क्षां निर्वक्ति। यत्पदेनेत्यादि। येन पदेन विना
यत्पदस्य अन्वयाननुभावकत्वं तेन सह तस्याकाङ्क्षा इत्यर्थः।
क्रियापदं विना कारकपदं नान्वयबोधं जनयतीति तेन
तस्याकाङ्क्षा। वस्तुतस्तु क्रियाकारकपदानां सन्निधान-
मासत्त्या चरितार्थम्। परन्तु घटकर्मताबोधं प्रति घट-
पदोत्तरद्वितीयाकाङ्क्षाज्ञानं कारणम्। तेन घटकर्मत्वमा-
नयनं कृतिरित्यादौ न शाब्दबोधः। अयमेति पुत्रो राज्ञः
पुरुषोऽपसार्य्यताम् इत्यादौ तु पुरुषेण सह राजपदस्य
तात्पर्य्यग्रहाभावात् न तेन सहान्वयः।

तात्पर्य्यं निर्वक्ति वक्तुरिच्छेति। यदि तात्पर्य्यज्ञानं कारणं
न स्यात् तदा सैन्धवमानयेत्यादौ क्वचिदश्वस्य क्वचिल्लवणस्य
बोधो न स्यात्। न च तात्पर्य्यग्राहकप्रकरणादीनामेव
शाब्दबोधे कारणत्वमस्त्विति वाच्यम् तेषामननुगमात्।
तात्पर्य्यज्ञानजनकत्वेन तेषामनुगमे तु तात्पर्य्यज्ञानमेव
लाघवात् कारणमस्तु। इत्थञ्च वेदस्थलेऽपि तात्पर्य्यज्ञानार्थ-
मीश्वरः कल्प्यते। न च तत्राध्यापकतात्पर्य्यज्ञानं कारण-
मिति वाच्यम् सर्गादावध्यापकाभावात्। न च प्रलय एव
नास्तीति। कुतः सर्गादिरिति वाच्यम् प्रलयस्यागमप्रति-
पाद्यत्वात्। इत्थञ्च शुकवाक्येऽपि ईश्वरीयतात्पर्य्यज्ञानं
कारणम्। विसंवादिशुकवाक्ये तु शिक्षयितुरेव तात्पर्य्यस्य

आकाङ्क्षा वक्तुरिच्छा तु
तात्पर्य्यं परिकीर्त्तितम् ॥ ८४ ॥

ज्ञान कारणम्। अन्ये तु नानार्थादौ क्वचिदेव तात्पर्य्यं ज्ञानं कारणम्। तथा च शुकवाक्ये विनैव तात्पर्य्यज्ञान शाब्दबोधः। वेदे तु अनादिमीमांसापरिशोधिततर्कैरर्थावधारणमित्याहुः।

पूर्वमनुभवस्मरणभेदात् बुद्धेर्द्वैविध्यमुक्तम्। तत्रानुभवप्रकारा दर्शिता सुगमतया स्मरणं न दर्शितम्। तत्र हि पूर्वानुभवः कारणम्। अत्र केचित् अनुभवत्वेन न कारणत्वं किन्तु ज्ञानत्वेन। अन्यथा स्मरणानन्तरं स्मरणं न स्यात् समानप्रकारकस्मरणेन पूर्वसंस्कारस्य विनष्टत्वात्। मन्मते तु तेनैव स्मरणेन संस्कारान्तरद्वारा स्मरणान्तरं जन्यत इत्याहुस्तन्न। यत्र समूहालम्बनोत्तर घटपटादीना क्रमेण स्मरणमजनिष्ट सकलविषयकस्मरणन्तु मा भूत् तत्र फलस्य संस्कारनाशकत्वाभावात् कालस्य रोगस्य चरमफलस्य वा संस्कारनाशकत्वं वाच्यम्। तथा च न क्रमिकस्मरणानुपपत्तिः। न च पुनः पुन स्मरणात् दृढतरसंस्कारानुपपत्ति झटित्युद्बोधकसमवधानस्य दार्ढ्यपदार्थत्वात्। न च वनिगमनाविरहादेव ज्ञानत्वेनापि जनकत्व स्यादिति वाच्यम् विशेषधर्मेणाव्यभिचारात् ज्ञाने सामान्यधर्मेणान्यथासिद्धत्वात्। कथमन्यथा दण्डस्य भ्रमिद्वारा द्रव्यत्वेन रूपेण न कारणत्वम्। न चान्त्यानिवस्मरणाना संस्कारनाशकत्वसंशयात् व्यभिचारसंशय इति वाच्यम्। अनन्त-

यत्पदेन विना यस्याननुभावकता भवेत्।

कत्वात् शाब्दबोधं प्रति प्रतिबन्धकत्वं सिद्धम्। योग्यताज्ञानविलम्बाच्च शाब्दबोधविलम्बोऽपि इति वदन्ति ॥ ८३॥

आकाङ्क्षां निर्वक्ति। यत्पदेनेत्यादि। येन पदेन विना यत्पदस्य अन्वयाननुभावकत्वं तेन सह तस्याकाङ्क्षेत्यर्थः। क्रियापदं विना कारकपदं नान्वयबोधं जनयतीति तेन तस्याकाङ्क्षा। वस्तुतस्तु क्रियाकारकपदानां सन्निधान सामग्र्या चरितार्थम्। परन्तु घटकर्मताबोधं प्रति घट पदोत्तरद्वितीयाकाङ्क्षाज्ञानं कारणम्। तेन घटः कर्मत्वम् आनयनं कृतिरित्यादौ न शाब्दबोधः। अयमेति पुत्रो राज्ञः पुरुषोऽपसार्य्यताम् इत्यादौ तु पुरुषेण सह राजपदस्य तात्पर्य[illegible]भावात् न तेन सहान्वयः।

तात्पर्यं निरूपयति वक्तुरिच्छेति। यदि तात्पर्यज्ञानं कारणं न स्यात् तदा सैन्धवमानयेत्यादौ क्वचिदश्वस्य क्वचिल्लवणस्य बोधो न स्यात्। न च तात्पर्यग्राहकप्रकरणादीनां शाब्दबोधे कारणत्वमस्त्विति वाच्यम् तेषामननुगमात्। तात्पर्यज्ञानजनकत्वेन तेषामनुगमे तु तात्पर्यज्ञानमेव कारणमस्तु [illegible] तात्पर्यज्ञानं [illegible] न च [illegible] तात्पर्यज्ञानं कारणं [illegible] [illegible]

आकाङ्क्षा वक्तुरिच्छा तु
तात्पर्य्यं परिकीर्त्तितम् ॥ ८४ ॥

ज्ञानं कारणम्। अन्ये तु नानार्थादौ क्वचिदेव तात्पर्य्य-ज्ञानं कारणम्। तथा च शुकवाक्ये विनैव तात्पर्य्यज्ञानं शाब्दबोधः। वेदे तु अनादिमीमांसापरिशोधिततर्कैरर्था-वधारणमित्याहुः।

पूर्वमनुभवस्मरणभेदात् बुद्धेर्द्वैविध्यमुक्तम्। तत्रानुभव-प्रकारा दर्शिताः सुगमतया स्मरणं न दर्शितम्। तत्र हि पूर्वानुभवः कारणम्। अत्र केचित् अनुभवत्वेन न कारणत्वं किन्तु ज्ञानत्वेन। अन्यथा स्मरणानन्तरं स्मरणं न स्यात् समानप्रकारकस्मरणेन पूर्वसंस्कारस्य विनष्टत्वात्। सम्प्रति तु तेनैव स्मरणेन संस्कारान्तरद्वारा स्मरणान्तरं जन्यत इत्याहुस्तन्न। यत्र समूहालम्बनोत्तरं घटपटादीनां क्रमेण स्मरणमजनिष्ट सकलविषयकस्मरणन्तु मा भूत् तत्र फलस्य संस्कारनाशकत्वाभावात् कालस्य रोगस्य चरमफलस्य वा संस्कारनाशकत्वं वाच्यम्। तथा च न क्रमिकस्मरणानुप-पत्तिः। न च पुनः पुनः स्मरणात् दृढतरसंस्कारानुपपत्तिः झटित्युद्बोधकसमवधानस्य दार्ढ्यपदार्थत्वात्। न च विनिगमनाविरहादेव ज्ञानत्वेनापि जनकत्वं स्यादिति वाच्यम् विशेषधर्मेणाव्यभिचारात् ज्ञाने सामान्यधर्मेणान्य-थासिद्धत्वात्। कथमन्यथा दण्डस्य भ्रमिद्वारा द्रव्यत्वेन रूपेण न कारणत्वम्। न चान्तरान्तरस्मरणानां संस्कार-नाशकत्वसंशयात् व्यभिचारसंशय इति वाच्यम्। अनन्त-

साक्षात्कारे सुखादीनां करणं मन उच्यते।
अयौगपद्यात् ज्ञानानां तस्याणुत्वमिहेष्यते ॥८५॥

सस्कारतन्नाशकल्पनापत्त्या चरमस्मरणस्यैव संस्कारनाशकत्वकल्पनेन व्यभिचारसंशयाभावात् ॥८४॥

इदानीं क्रमप्राप्तं मनो निरूपयति साक्षात्कार इति। एतेन मनसि प्रमाणं दर्शितम्। तथा हि सुखसाक्षात्कारः सकरणको जन्यसाक्षात्कारत्वात् चाक्षुषवत् इत्यनुमानेन करणस्य मनसः सिद्धेः। न चैवं दुःखादिसाक्षात्काराणामपि करणान्तराणि स्युरिति वाच्यम्। लाघवादेकस्यैव तादृशसकलसाक्षात्कारकरणतया सिद्धेः। एवं दुःखादीनामसमवायिकारणसंयोगाश्रयतया मनःसिद्धिर्बोद्धव्या।

मनसोऽणुत्वे प्रमाणमाह अयौगपद्यादिति। ज्ञानानां चाक्षुषरासनादीनां यौगपद्यमेककालोत्पत्तिर्नास्तीत्यनुभवसिद्धम्। तत्र नानेन्द्रियाणां सत्यपि विषयसन्निकर्षे यत्सम्बन्धादेकेन्द्रियेण ज्ञानमुत्पद्यते तदसम्बन्धादपि त्वगादिभिः परैर्ज्ञानं नोत्पद्यते। तन्मनोविभुत्वे च असन्निधानं न सम्भवतीति न विभु मनः। न च तदानीमदृष्टविशेषोद्बोधविलम्बादेव तज्ज्ञानविलम्ब इति वाच्यम्। तथा सति चक्षुरादीनामपि कल्पनाऽनापत्तेः। न च दीर्घशष्कुलीभक्षणादौ नानावधानभाजाञ्च कथमेकदा नानेन्द्रियज्ञानमिति वाच्यम् मनसोऽतिलाघवात् त्वरया नानेन्द्रियसम्बन्धात नानाज्ञानोत्पत्तेः। उत्पलशतपत्रभेदादिव

अथ द्रव्याश्रिता ज्ञेया निर्गुणा निष्क्रिया गुणाः।
रूपं रसः स्पर्शगन्धौ परत्वमपरत्वकम् ॥८६॥

यौगपद्यप्रत्ययस्य तु भ्रान्तत्वात्। न च मनस सङ्कोचविकाशशालित्वादुभयोपपत्तिरस्त्विति वाच्यम् नानावयवतन्नाशादिकल्पने गौरवात् लाघवात् निरवयवस्यैव मनसः कल्पनादिति संक्षेपः।

इति सिद्धान्तमुक्तावल्यां द्रव्यपदार्थ व्याख्या समाप्ता ॥८५॥

द्रव्यं निरूप्य गुणं निरूपयति अथेत्यादिना। गुणत्वजातौ किं मानमिति चेत्। इदम्। द्रव्यकर्मभिन्नसामान्यवति या कारणता सा किञ्चिद्धर्मावच्छिन्ना निरवच्छिन्नकारणताया असम्भवात्। न हि रूपत्वादिकं सत्ता वा तदवच्छेदिका न्यूनातिरिक्तदेशवृत्तित्वात्। अतश्चतुर्विंशत्यनुगतं वाच्यं तदेव गुणत्वमिति सिद्धम्। द्रव्याश्रिता इति। यद्यपि द्रव्याश्रितत्वं न लक्षणं कर्मादावतिव्याप्तेः तथापि द्रव्यत्वव्यापकतावच्छेदकसत्तान्यजातिमत्त्वं तदर्थः। भवति हि गुणत्वं द्रव्यत्वव्यापकतावच्छेदकं तद्वत्ता च गुणानामिति कर्मत्वं द्रव्यत्वं वा न द्रव्यत्वव्यापकतावच्छेदकम् गगनादौ कर्मणोऽभावात्। द्रव्यत्वसामान्यादि च न जातिरिति तद्व्युदासः। निर्गुणा इति। यद्यपि निर्गुणत्वं कर्मादावपि तथापि सामान्यवत्त्वे कर्मान्यत्वे च सति निर्गुणत्वं बोध्यम्। ज्ञानादीनां न सामान्यवत्त्व दशायां न कर्मादेः स्पष्टं च निर्गुणत्वमिति तत्

द्रवो गुरुत्वं स्नेहश्च
वेगो मूर्त्तगुणा अमी ।
धर्माधर्मौ भावना च
शब्दो बुद्ध्यादयोऽपि च ॥८७॥
एतेऽमूर्त्तगुणाः सर्वे विद्वद्भिः परिकीर्त्तिताः ।
संख्यादिश्च विभागान्त उभयेषां गुणो मतः॥८८
संयोगश्च विभागश्च संख्या द्वित्वादिकास्तथा ।
द्विपृथक्त्वादयस्तद्वदेतेऽनेकाश्रिता गुणाः ॥८९॥
अतः शेषा गुणाः सर्वे
मता एकैकवृत्तयः ।
बुद्ध्यादिषट्कं स्पर्शान्ताः
स्नेहः सांसिद्धिको द्रवः ॥९०॥

नातिव्याप्तिः । निष्क्रियेति स्वरूपकथनं न तु लक्षणम् । गगनादावतिव्याप्तेः ॥ ८६ ॥

मूर्त्तगुणा इति । वेगेन स्थितिस्थापकोऽप्युपलक्षणीयः । अमूर्त्तेषु न वर्त्तन्त इत्यर्थः । लक्षणन्तु तावदन्यान्यत्वम् एवमग्रेऽपि ॥ ८७ ॥

उभयेषामिति । मूर्त्तामूर्त्तगुणा इत्यर्थः ॥ ८८ ॥

अनेकाश्रिता इति । संयोगद्वित्वादीनि द्विवृत्तीनि । द्वित्व चतुष्टयादिकं त्रिचतुरादिवृत्तीति बोध्यम् ॥ ८९ ॥

अत शेषा इति । रूपरसगन्धस्पर्शैकत्वपरिमाणैकपृथ

अदृष्टभावना शब्दा अमी वैशेषिका गुणाः।
संख्यादिरपरत्वान्तो द्रवोऽसांसिद्धिकस्तथा ॥९१॥
गुरुत्ववेगौ सामान्यगुणा एते प्रकीर्त्तिताः।
संख्यादिरपरत्वान्तो द्रवत्वं स्नेह एव च ॥ ९२ ॥
एते तु द्वीन्द्रियग्राह्या अथ स्पर्शान्तशब्दकाः।
बाह्यैकैकेन्द्रियग्राह्या गुरुत्वादृष्टभावनाः ॥ ९३ ॥
अतीन्द्रिया विभूनान्तु ये स्युर्वैशेषिका गुणाः।
अकारणगुणोत्पन्ना एते तु परिकीर्त्तिताः ॥९४॥
अपाकजास्तु स्पर्शान्ता द्रवत्वञ्च तथाविधम्।
स्नेहवेगगुरुत्वैकपृथक्त्वपरिमाणकम् ॥ ९५ ॥
स्थितिस्थापक इत्येते स्युः कारणगुणोद्भवाः।
संयोगश्च विभागश्च वेगश्चैते तु कर्मजाः ॥ ९६ ॥

ज्ञापरत्वापरत्वबुद्धिसुखदुःखेच्छाद्वेष-प्रयत्नगुरुत्व-द्रवत्वस्नेहसंस्कारादृष्टशब्दा इत्यर्थः। द्रवो द्रवत्वम् ॥ ९० ॥

वैशेषिका इति। विशेषा एव वैशेषिकाः स्वार्थे ठक् विशेषगुणा इत्यर्थः। संख्यादिरिति। सङ्ख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वानीत्यर्थः ॥ ९१ ॥ ९२ ॥

द्वीन्द्रियेति। चक्षुषा त्वचाऽपि ग्रहणयोग्यत्वात्। बाह्येति। रूपादीनां चक्षुरादिग्राह्यत्वात् ॥ ९३ ॥

विभूनामिति। बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाशब्दा इत्यर्थः। अकारणेति। कारणगुणपूर्वका रूपा-

स्पर्शान्तपरिमाणैकपृथक्त्वस्नेहशब्दके ।
भवेदसमवायित्वमथ वैशेषिके गुणे ॥ ९७ ॥
आत्मनः स्यान्निमित्तत्वमुष्णस्पर्शगुरुत्वयोः ।
वेगेऽपि च द्रवत्वे च संयोगादिद्वये तथा ॥ ९८ ॥
द्विधैव कारणत्वं स्यादथ प्रादेशिको भवेत् ।
वैशेषिको विभुगुणः संयोगादिद्वयं तथा ॥ ९९ ॥

दयो यन्त्रतो । बुद्ध्यादयस्तु न तादृशाः । आत्मादेः कारणा-भावात् । पाकजरूपादीनां कारणगुणपूर्वकत्वाभाव [illegible] ॥ ८४ । ८५ ॥ ८६ ॥

स्पर्शान्त इति । [illegible] । [illegible] एकत्वं पृथक्त्वं [illegible] ैकपृथक्त्वं विवक्षितम् ।

भवेदसमवायित्वमिति । घटादिरूपपरिमाणस्पर्शाः [illegible] भवन्ति । [illegible] कपालादि [illegible] घटादिपरिमाणासमवायिकारणत्वम् । [illegible] इति ॥ ९७ ॥

[illegible] ॥ ९८ ॥

[illegible]

चक्षुर्ग्राह्यं भवेद्रूपं द्रव्यादेरुपलम्भकम्।
चक्षुषः सहकारि स्यात् शुक्लादिकमनेकधा ॥१००

निमित्तम्। द्रवत्वं द्रवत्वस्यन्दनयोरसमवायि संग्रहे निमित्तम्। भेरीदण्डयोगः शब्दे निमित्तम्। भेर्य्याकाशसंयोगोऽसमवायी वंशदलद्वयविभागः शब्दे निमित्तम्। वंशदलाकाशविभागोऽसमवायीति। प्रादेशिकोऽव्याप्यवृत्ति ॥ ९९ ॥

चक्षुरिति। रूपत्वजातिः प्रत्यक्षसिद्धा। रूपशब्दोल्लेखिनी प्रतीतिर्नास्तीति चेत्। मास्तु रूपशब्दप्रयोगस्तथापि नीलपीतादिष्वनुगतजातिविशेषोऽनुभवसिद्ध एव। रूपशब्दाप्रयोगेऽपि नीलो वर्णः पीतो वर्ण इति वर्णशब्दोल्लेखिनी प्रतीतिरस्त्येव। एवं नीलत्वादिकमपि प्रत्यक्षसिद्धम्। न चैकैका एव नीलरूपादिव्यक्तय इत्येकव्यक्तिवृत्तित्वान्नीलत्वादिर्न जातिरिति वाच्यम्। नीलो नष्टो रक्त उत्पन्न इत्यादिप्रतीतेर्नीलादेरुत्पादविनाशशालितया नानात्वात्। अन्यथा एकनीलनाशे जगदनीलमापद्येत। न च नीलरक्तादिसमवाययोरेव विनाशोत्पादविषयकोऽसौ प्रत्यय इति वाच्यम्। प्रतीत्या समवायानुल्लेखात्। न च स एवायं नील इति प्रत्ययाल्लाघवाच्चैक्यमिति वाच्यम्। प्रत्ययस्य तज्जातीयविषयकत्वात्। सैवेयं गुर्जरीतिवल्लाघवं प्रत्यक्षबाधितम्। अन्यथा घटादीनामप्यैक्यप्रसङ्गात्। उत्पादविनाशशब्दबुद्धेः समवायावलम्बनत्वापत्तेरिति। एतेन रसादिकं व्याख्यातम्। चक्षुर्ग्राह्यमिति। चक्षुर्ग्राह्यविशेष-

गुण इत्यर्थः। एवमग्रेऽपि। द्रव्यादेरिति। उपलम्भकम् उपलब्धिकारणम्।

इदमेव विहृणोति। चक्षुष इति द्रव्यगुणकर्मसामान्यानां चाक्षुषप्रत्यक्षं प्रति उद्भूतरूपं कारणम्। शुक्लादिकमनेकधेति। तद्रूपं शुक्लनीलपीतरक्तकर्बुरादिभेदादनेकप्रकारकं भवति। ननु कर्बुरं कथमिति रक्तरूपं भवति? इत्थं, नीलपीताद्यारब्धोऽवयवी न तावन्नीलरूपः अप्रत्यक्षप्रसङ्गात्। नापि व्याप्यवृत्तिनीलादिकमुत्पद्यते पीतावच्छेदेनापि नीलोपलब्धिप्रसङ्गात् नाप्यव्याप्यवृत्तिनीलादिकमुत्पद्यते व्याप्यवृत्तिजातीयगुणानामव्याप्यवृत्तित्वे विरोधात्। तस्मात् नानाजातीयरूपैरवयविनि विजातीयं चित्रमारभ्यते। अत एवैकं चित्रमित्यनुभवोऽपि। नानारूपकल्पने तु गौरवात्। इत्थञ्च नीलादीनां पीताद्यारम्भे प्रतिबन्धकत्वकल्पनात् अवयविनि न पीताद्युत्पत्तिः। एतेन स्पर्शो व्याख्यातः। रसादिकमपि नाव्याप्यवृत्ति किन्तु नानाजातीयरसवदवयवैरारब्धेऽवयविनि रसाभावेऽपि न क्षतिः। तत्र रसनया अवयवरस एव गृह्यते रसनेन्द्रियादीनां द्रव्यग्रहसामर्थ्याभावात् अवयविनो नीरसत्वे क्षतेरभावात्। नव्यास्तु तत्राव्याप्यवृत्त्येव नाना ... । नीलादेः पीतादिप्रतिबन्धकत्वकल्पने गौरवात् ...

लोहितो यस्तु वर्णेन मुखे पुच्छे च पाण्डुरः।
श्वेतः खुरविषाणाभ्यां स नीलो वृष उच्यते॥

इत्यादिशास्त्रमप्युपपद्यते। न च व्याप्याव्याप्यवृत्तिजाती

जलादिपरमाणौ तन्नित्यमन्यत् सहेतुकम्।
रसस्तु रसनाग्राह्यो मधुरादिरनेकधा ॥ १०१ ॥
सहकारी रसज्ञाया नित्यतादि च पूर्ववत्।
घ्राणग्राह्यो भवेद्गन्धो घ्राणस्यैवोपकारकः ॥ १०२
सौरभश्चासौरभश्च स द्वेधा परिकीर्त्तितः।
स्पर्शस्त्वगिन्द्रियग्राह्यस्त्वचः स्यादुपकारकः ॥१०३॥

ययोर्द्वयोर्विरोधः मानाभावात्। न च लाघवादैकं रूपम्। अनुभवविरोधात्। अन्यथा घटादेरपि लाघवादैक्यं स्यादिति। एतेन स्पर्शादिकं व्याख्यातमिति वदन्ति। १०० ॥

जलादीति। जलपरमाणौ तेजःपरमाणौ च रूपं नित्यं पृथिवीपरमाणुरूपन्तु न नित्यम् पाकेन रूपान्तरोत्पत्तेः। न हि घटस्य पाकानन्तरं तदवयवोऽपक्व उपलभ्यते। न हि रक्तकपालस्य कपालिका नीलावयवा भवति। एवं क्रमेण परमाणावपि पाकसिद्धिः।

अन्यज्जलतेजःपरमाणुरूपभिन्नं रूपं सहेतुकं जन्यम्। रसं निरूपयति। रसस्त्विति ॥ १०१ ॥

सहकारीति। रासनज्ञाने रसः कारणमित्यर्थः। पूर्ववदिति। जलपरमाणौ रसो नित्योऽन्यः सर्वोऽपि रसोऽनित्य इत्यर्थः। गन्धं निरूपयति। घ्राणग्राह्य इति। उपकारको घ्राणजन्यज्ञाने कारणमित्यर्थः। अन्यो गन्धः सर्वोऽनित्य एव। १०२ ॥

अनुष्णाशीतशीतोष्ण-
भेदात् स त्रिविधो मतः।
काठिन्यादिः क्षिताविव
नित्यतादि च पूर्ववत् ॥ १०४ ॥

एतेषां पाकजत्वन्तु क्षितौ नान्यत्र कुत्रचित्।

स्पर्शं निरूपयति। स्पर्श इति। उपकारक इति स्पार्शनप्रत्यक्षे स्पर्शः कारणमित्यर्थः ॥ १०३ ॥

अनुष्णाशीत इति। पृथिव्या वायोश्च स्पर्शोऽनुष्णाशीतः। जलस्य शीतः। तेजस उष्णः। काठिन्येति। कठिनसुकुमारस्पर्शौ पृथिव्या एवेत्यर्थः। कठिनत्वादिकन्तु न संयोगनिष्ठो जातिविशेषः चक्षुर्ग्राह्यतापत्तेः। पूर्ववदिति। जलतेजोवायुपरमाणुस्पर्शा नित्यास्तद्भिन्नस्पर्शास्त्वनित्या इत्यर्थः ॥ १०४ ॥

एतेषामिति। एतेषां रूपरसगन्धस्पर्शानाम्। नान्यत्रेति। पृथिव्या हि रूपरसगन्धस्पर्शपरावृत्तिः पावकसंयोगादुपलभ्यते। न हि शतधापि ध्मायमाने जलादौ रूपा[illegible] परावर्त्तते। नीरे सौरभमौष्ण्यञ्च अन्वयव्यतिरेकाभ्या[illegible] [illegible]कमेवेति निर्णीयते। पवनपृथिव्योः शीतस्पर्शादि[illegible] [illegible]। तत्रापि पृथिवीष्वपि मध्ये परमाणाविव पाक इति वदन्ति। तेषामयमाशयः। अवयविनाऽवष्टब्धे[illegible] [illegible] पाको न सम्भवति। परन्तु वह्निसंयोगेनावय[illegible] विनष्टेषु स्वतन्त्रेषु परमाणुषु पाकः। पुनश्च पक्कपर[illegible]

तत्रापि परमाणौ स्यात् पाको वैशेषिके नये ॥१०५

माणुसंयोगाद् द्व्यणुकादिक्रमेण पुनर्महावयविपर्य्यन्तमुत्पत्तिः। तेजसामतिशयितवेगवशात् पूर्वव्यूहनाशो झटिति व्यूहान्तरोत्पत्तिश्चेति। अथ द्व्यणुकादिविनाशमारभ्य कतिभिः क्षणैः पुनरुत्पत्त्या रूपादिमद्भवतीति शिष्यबुद्धिवैशद्याय प्रक्रिया स्यात्। तत्र संयोगविभागयोरनपेक्षकारणं कर्म इति वैशेषिकसूत्रम्। स्वोत्तरवृत्तिभावान्तरानपेक्षत्वं तस्यार्थः। अन्यथा कर्मणोऽप्युत्तरसंयोगजनने पूर्वसंयोगनाशापेक्षणादव्याप्तिः स्यादिति। तत्र विभागजविभागानङ्गीकारे नव क्षणाः। तदङ्गीकारेऽपि विभागः किञ्चित्सापेक्षो विभागं जनयेत् निरपेक्षस्य तत्त्वे कर्मत्वं स्यात् तत्र यदि द्रव्यारम्भकसंयोगविनाशविशिष्टं कालमपेक्ष्य विभागजविभागः स्यात् तदा दशक्षणाः। अथ द्रव्यनाशविशिष्टं कालमवयवं वापेक्ष्य विभागजविभागः स्यात् तदा एकादश क्षणाः। तथा हि वह्निसंयोगात् परमाणौ कर्म। ततः परमाण्वन्तरेण विभागः। ततः आरम्भकसंयोगनाशः। ततो द्व्यणुकनाशः। ततः परमाणौ श्यामादिनाशः। ततो रक्ताद्युत्पत्तिः। ततो द्रव्यारम्भानुगुणक्रिया। ततो विभागः। ततः पूर्वसंयोगनाशः। तत आरम्भकसंयोगः। ततो द्व्यणुकोत्पत्तिः। ततो रक्ताद्युत्पत्तिः। ननु श्यामादिनाशक्षणे रक्तोत्पत्तिक्षणे वा परमाणौ द्रव्यारम्भानुगुणक्रियाऽस्त्विति चेत्। न क्रि-

मयुक्ते परमाणौ यत् कर्म्म तद्विनाशमन्तरेण गुणोत्पत्ति-मन्तरेण च तत्र परमाणौ क्रियान्तराभावात् कर्म्मवति कर्म्मानुत्पत्तेः। निर्गुणे द्रव्ये द्रव्यारम्भानुगुणक्रियानुपपत्तेश्च। तथापि परमाणौ श्यामादिनिवृत्तिसमकालं रक्ताद्युत्पत्तिः स्यादिति चेत्। न। पूर्वरूपादिध्वंसस्य रूपान्तरे हेतुत्वात्। इति नव क्षणाः। अथ दश क्षणाः। सा च आरम्भकसंयोगविनाशविशिष्टं कालमपेक्ष्य विभागेन विभागजनने सति स्यात्। तथा हि वह्निसंयोगाद् द्व्यणु-कारम्भके परमाणौ क्रिया। ततो विभागः। तत आर-म्भकसंयोगनाशः। ततो द्व्यणुकनाशविभागजविभागौ। ततः श्यामनाशपूर्वसंयोगनाशौ। ततो रक्तोत्पत्त्युत्तर-संयोगौ। ततो वह्निनोदनजन्यपरमाणुकर्म्मणो नाशः। ततोऽदृष्टवदात्मसंयोगाद् द्रव्यारम्भानुगुणक्रिया। ततो विभागः। ततः पूर्वसंयोगनाशः। तत आरम्भकसंयोगः। ततो द्व्यणुकोत्पत्तिः। ततो रक्ताद्युत्पत्तिः। अथैकादश क्षणाः। वह्निसंयोगात् परमाणौ कर्म। ततो विभागः। ततो द्रव्यारम्भकसंयोगनाशः। ततो द्व्यणुकनाशः। ततो द्व्यणुकनाशविशिष्टं कालमपेक्ष्य विभागजविभागः। ततः पूर्वसंयोगनाशः। तत उत्तरसंयोगः। ततः परमाणुकर्म-नाशः। ततोऽदृष्टवदात्मसंयोगाद् द्रव्यारम्भानुगुणक्रिया। ततो विभागः। ततः पूर्वसंयोगनाशः। ततो द्रव्यारम्भक-संयोगः। ततो द्व्यणुकम्। ततो रक्तादि। मध्यमशब्द-वदेकस्मादग्निसंयोगान्न रूपनाशरक्तोत्पादौ। तावत्काल-ाग्नेरस्थिरत्वात्। किञ्च यद्युत्पादको नाशकस्तदा

नैयायिकानान्तु नये द्व्यणुकादावपीष्यते ।
गणनव्यवहारे तु हेतुः संख्याऽभिधीयते ॥ १०६ ॥

नष्टे रूपादावग्निनाशे नीरूपमिदं परमाणु स्यात्। नाशकाभावे तदुत्पादकस्तदा रक्तोत्पत्तौ तदग्निनाशे रक्तता न स्यात्। एवं परमाण्वन्तरे कर्मचिन्तनात् पञ्चमादिक्षणेऽपि गुणोत्पत्तिः। तथा हि एकत्र परमाणौ कर्म। ततो विभागः। तत आरम्भकसंयोगनाशपरमाण्वन्तरकर्मणी। ततस्तु द्व्यणुकनाशः। परमाण्वन्तरकर्मजश्च विभाग इत्येकः कालः। ततः श्यामादिनाशः। विभागाच्च पूर्वसंयोगनाश इत्येकः कालः। ततो रक्तोत्पत्तिर्द्रव्यारम्भकसंयोग इत्येकः कालः। अथ द्व्यणुकोत्पत्तिः। अथ रक्तोत्पत्तिरिति पञ्च क्षणाः। द्रव्यनाशसमकालं परमाण्वन्तरे कर्मचिन्तनात् षष्ठे गुणोत्पत्तिः। तथा हि परमाणुकर्मणा परमाण्वन्तरविभागः। तत आरम्भकसंयोगनाशः। अथ द्व्यणुकनाशपरमाण्वन्तरकर्मणी। अथ श्यामनाशपरमाण्वन्तरकर्मजविभागः। ततो रक्तोत्पत्तिः परमाण्वन्तरपूर्वसंयोगनाशश्च। ततः परमाण्वन्तरसंयोगः। ततो द्व्यणुकोत्पत्तिः। अथ रक्तोत्पत्तिरिति। एवं श्यामनाशक्षणे परमाण्वन्तरे कर्मचिन्तनात् सप्त क्षणाः। रक्तोत्पत्तिसमकालं परमाण्वन्तरे कर्मचिन्तनात् अष्ट क्षणा इति ॥ १०५ ॥

नैयायिकानामिति। नैयायिकानां मते द्व्यणुकादौ अवयविन्यपि पाको भवति [illegible]। [illegible]

नित्येषु नित्यमेकत्वमनित्येऽनित्यमिष्यते।
द्वित्वादयः परार्द्धान्ता अपेक्षाबुद्धिजा मताः १०७
अनेकाश्रयपर्य्याप्ता एते तु परिकीर्त्तिताः।
अपेक्षाबुद्धिनाशाच्च नाशस्तेषां निरूपितः ॥१०८

मच्छिद्रत्वादङ्गैः सूक्ष्मावयवैरन्तःप्रविष्टैरवयवेष्ववष्टब्धेष्वपि पाको न विरुध्यते। वैशेषिकमतेऽनन्तावयवतन्नाशकल्पने गौरवात्। इत्यञ्च सोऽयं घट इत्यादिप्रत्यभिज्ञाऽपि सङ्गच्छते। यत्र तु न प्रत्यभिज्ञा तत्रावयविनाशोऽपि स्वीक्रियत इति। सङ्ख्यां निरूपयितुमाह। गणनेति। गणनव्यवहारासाधारणकारणं सङ्ख्येत्यर्थः॥ १०६ ॥

नित्येष्विति। नित्येषु परमाण्वादिषु एकत्वं नित्यम्। अनित्ये घटादौ एकत्वमनित्यमित्यर्थः। द्वित्वादयो व्यासज्यवृत्तिसंख्या अपेक्षाबुद्धिजन्याः॥ १०७ ॥

अनेकेति। यद्यपि द्वित्वादिसमवायः प्रत्येकं घटादावपि वर्त्तते तथाप्येको द्वाविति प्रत्ययाभावात् एको न द्वाविति प्रत्ययसम्भवाच्च द्वित्वादीनां पर्य्याप्तिलक्षणः कश्चन सम्बन्धोऽनेकाश्रयोऽभ्युपगम्यते। अपेक्षाबुद्धिनाशादिति। प्रथममपेक्षाबुद्धिस्ततो द्वित्वोत्पत्तिः। ततो विशेषणज्ञानं द्वित्वत्वनिर्विकल्पकरूपम्। ततो द्वित्वविशिष्टप्रत्यक्षम्। पेक्षाबुद्धिनाशे ततो द्वित्वनाश इति। यद्यपि ज्ञानानां त्रिक्षणमात्रस्थायियोग्यविभुविशेषगुणानां स्वोत्तरवर्त्ति... श्यत्वात् तथाप्यपेक्षाबुद्धेस्त्रिक्षणस्थायित्व कल्प्यते।

अनेकैकत्वबुद्धिर्या साऽपेक्षाबुद्धिरुच्यते ।
परिमाणं भवेत् मानव्यवहारस्य कारणम् ॥१०९॥

अन्यथा निर्विकल्पककाले अपेक्षाबुद्धिनाशात् अनन्तरं द्वित्वस्यैव नाशः स्यात् न तु द्वित्वप्रत्यक्षम् तदानीं विषयाभावात्। विद्यमानस्यैव चक्षुरादिना ज्ञानजननोपगमात्। तस्माद् द्वित्वप्रत्यक्षादिकमपेक्षाबुद्धेर्नाशकं कल्प्यते। न चापेक्षाबुद्धिनाशात् कथं द्वित्वनाश इति वाच्यम् कालान्तरे द्वित्वप्रत्यक्षाभावात्। अपेक्षाबुद्धिस्तदुत्पादिका तन्नाशनाशक इति कल्पनात्। अत एव तत्पुरुषीयापेक्षाबुद्धिजन्यद्वित्वादिकं तेनैव गृह्यत इति कल्प्यते। न चापेक्षाबुद्धेर्द्वित्वप्रत्यक्षकारणत्वमस्त्विति वाच्यम्। लाघवेन द्वित्वं प्रति कारणत्वस्यैवोचितत्वात्। अतीन्द्रिये द्व्यणुकादावपेक्षाबुद्धिर्योगिनाम्। सर्गादिकालीनपरमाण्वादावीश्वरीयापेक्षाबुद्धिर्ब्रह्माण्डान्तरवर्त्तियोगिनामपेक्षाबुद्धिर्वा द्वित्वादिकारणमिति। १०८।

अपेक्षाबुद्धिं दर्शयति। अनेकेति। अयमेक इत्याकारिका इत्यर्थः। इदन्तु बोध्यं यत्रानियतैकत्वज्ञानं तत्र त्रित्वादिभिन्ना बहुत्वसङ्ख्योत्पद्यते। यथा सेनावनादाविति कन्दलीकारः। आचार्य्यास्तु त्रित्वादिकमेव बहुत्वं मन्यन्ते तथा च त्रित्वादिव्यापिका बहुत्वजातिः। सेनादौ चाप्युत्पन्ने त्रित्वादौ त्रित्वत्वाद्यग्रहो दोषात्। इत्थञ्च [illegible] प्रत्ययः। बहुत्वस्य संख्यान्तरत्वे [illegible] प्रमाणाभावादिति [illegible]। परिमाणं निरू-

नित्येषु नित्यमेकत्वमनित्येऽनित्यमिष्यते।
द्वित्वादयः परार्द्धान्ता अपेक्षाबुद्धिजा मताः॥१०७
अनेकाश्रयपर्य्याप्ता एते तु परिकीर्त्तिताः।
अपेक्षाबुद्धिनाशाच्च नाशस्तेषां निरूपितः॥१०८

सच्छिद्रत्वादङ्के: सूक्ष्मावयवैरन्तःप्रविष्टैरवयवेष्ववष्टब्धेष्वपि पाको न विरुध्यते। वैशेषिकमतेऽनन्तावयवतन्नाशकल्पने गौरवात्। इत्यञ्च सोऽयं घट इत्यादिप्रत्यभिज्ञाऽपि सङ्गच्छते। यत्र तु न प्रत्यभिज्ञा तत्रावयविनाशोऽपि स्वीक्रियत इति। सङ्ख्यां निरूपयितुमाह। गणनेति। गणनव्यवहारासाधारणकारणं सङ्ख्येत्यर्थः॥ १०६ ॥

नित्येष्विति। नित्येषु परमाण्वादिषु एकत्वं नित्यम्। अनित्ये घटादौ एकत्वमनित्यमित्यर्थः। द्वित्वादयो व्यासज्यवृत्तिसङ्ख्या अपेक्षाबुद्धिजन्याः॥ १०७ ॥

अनेकेति। यद्यपि द्वित्वादिसमवायः प्रत्येकं घटादावपि वर्त्तते तथाप्येको द्वाविति प्रत्ययाभावात् एको न द्वाविति प्रत्ययसम्भवाच्च द्वित्वादीनां पर्य्याप्तिलक्षणः कश्चन सम्बन्धोऽनेकाश्रयोऽभ्युपगम्यते। अपेक्षाबुद्धिनाशादिति। प्रथममपेक्षाबुद्धिस्ततो द्वित्वोत्पत्तिः। ततो विशेषणज्ञानं द्वित्वत्वनिर्विकल्पकरूपम्। ततो द्वित्वविशिष्टप्रत्यक्षम्। अपेक्षाबुद्धिनाशे ततो द्वित्वनाश इति। यद्यपि ज्ञानान्तरं न त्रिक्षणमात्रस्थायियोग्यविभुविशेषगुणानां स्वोत्तरवर्त्तिनाश्यत्वात् तथाप्यपेक्षाबुद्धेस्त्रिक्षणस्थायित्वं कल्प्यते।

अनेकैकत्वबुद्धिर्या साऽपेक्षाबुद्धिरुच्यते।
परिमाणं भवेत् मानव्यवहारस्य कारणम् ॥१०९॥

अन्यथा निर्विकल्पककाले अपेक्षाबुद्धिनाशात् अनन्तरं द्वित्वस्यैव नाशः स्यात् न तु द्वित्वप्रत्यक्षम् तदानीं विषयाभावात्। विद्यमानस्यैव चक्षुरादिना ज्ञानजननोपगमात्। तस्माद् द्वित्वप्रत्यक्षादिकमपेक्षाबुद्धेर्नाशकं कल्प्यते। न चापेक्षाबुद्धिनाशात् कथं द्वित्वनाश इति वाच्यम् कालान्तरे द्वित्वप्रत्यक्षाभावात्। अपेक्षाबुद्धिस्तदुत्पादिका तन्नाशस्तन्नाशक इति कल्पनात्। अत एव तत्पुरुषीयापेक्षाबुद्धिजन्यद्वित्वादिकं तेनैव गृह्यत इति कल्प्यते। न चापेक्षाबुद्धेर्द्वित्वप्रत्यक्षकारणत्वमस्त्विति वाच्यम्। लाघवेन द्वित्वं प्रति कारणत्वस्यैवोचितत्वात्। अतीन्द्रिये द्व्यणुकादावपेक्षाबुद्धिर्योगिनाम्। सर्गादिकालीनपरमाण्वादावीश्वरीयापेक्षाबुद्धिर्ब्रह्माण्डान्तरवर्त्तियोगिनामपेक्षाबुद्धिर्वा द्वित्वादिकारणमिति ॥१०८॥

अपेक्षाबुद्धिः केत्यत आह। अनेकेति। अयमेक इत्याकारिका इत्यर्थः। इदन्तु बोध्यं यत्रानियतैकत्वज्ञानं तत्र त्रित्वादिभिन्ना बहुत्वसंख्योत्पद्यते। यथा सेनावनादाविति कन्दलीकारः। आचार्यास्तु त्रित्वादिकमेव बहुत्वं मन्यन्ते। तथा च त्रित्वत्वादिव्यापिका बहुत्वत्वजातिः। सेनादौ चोत्पन्ने त्रित्वादौ त्रित्वत्वाद्यग्रहो दोषात्। इत्थञ्च इतो बहुलेयं सेनेति प्रतीतिरुपपद्यते। बहुत्वस्य संख्यान्तरत्वे तत्तारतम्याभावादित्यवधेयम्। परिमाणं निरू-

अणु दीर्घं महद्ध्रस्वमिति तद्भेद ईरितः ।
अनित्ये तदनित्यं स्यान्नित्ये नित्यमुदाहृतम् ॥११०॥
संख्यातः परिमाणाच्च प्रचयादपि जायते ।
अनित्यं द्व्यणुकादौ तु संख्याजन्यमुदाहृतम् ॥१११॥
परिमाणं घटादौ तु परिमाणजमुच्यते ।
प्रचयः शिथिलाख्यो यः संयोगस्तेन जन्यते ॥११२॥

पयति । परिमाणमिति । परिमितिव्यवहारासाधारणं कारणं परिमाणमित्यर्थः ॥ १०९ ॥

तच्चतुर्विधं अणु महद् दीर्घं ह्रस्वञ्च । तत् परिमाणं । नित्यमित्यत्र परिमाणमित्यनुषज्यते ॥ ११० ॥

जायत इत्यत्रापि परिमाणमित्यनुवर्त्तते । अनित्यमिति पूर्वेणान्वितम् । तथा चानित्यं परिमाणं सङ्ख्याजन्यं परिमाणजन्यं प्रचयजन्यं चेत्यर्थः । तत्र सङ्ख्याजन्यमुदाहरति । द्व्यणुकादाविति । द्व्यणुकस्य त्रसरेणोश्च परिमाणं प्रति परमाणुपरिमाणं द्व्यणुकादिपरिमाणं वा । कारणम् परिमाणस्य स्वसमानजातीयोत्कृष्टपरिमाणजनकत्व । द्व्यणुकादिपरिमाणन्तु परमाणुत्वापेक्षया नोत्कृष्टम् । त्रसरेणुपरिमाणन्तु न सजातीयम् । अतः परमाणु द्वित्वसङ्ख्या द्व्यणुकपरिमाणस्य, द्व्यणुके त्रित्वसङ्ख्या त्रसरेणुपरिमाणस्यासमवायिकारणमित्यर्थः ॥ १११ ॥

परिमाणजन्यमुदाहरति । परिमाणं घटादाविति ।

परिमाणं तूलकादौ नाशस्त्वाश्रयनाशतः।
संख्यावत्तु पृथक्त्वं स्यात् पृथक्प्रत्ययकारणम्॥११३

परिमाणजं कपालादिपरिमाणजन्यम्। प्रचयजन्यमुदाहर्त्तुं प्रचय निर्वक्ति। प्रचय इति॥ ११२॥

नाश इति। अर्थात् परिमाणस्य। न चावयवनाशः कथं परिमाणनाशकः सत्यप्यवयविनि त्रिचतुरपरमाणुविश्लेषे तदुपचये चावयविनः प्रत्यभिज्ञानेऽपि परिमाणान्तरस्य प्रत्यक्षसिद्धत्वादिति वाच्यम् "परमाणुविश्लेषे द्व्यणुकस्य नाशोऽवश्यमभ्युपेयस्तन्नाशे च त्रसरेणुकनाशः" एवं क्रमेण महावयविनो नाशस्यावश्यकत्वात् सति च नाशकेऽनभ्युपगममात्रेण नाशस्यापवदितुमशक्यत्वात्। शरीरादावयवोपचयेऽसमवायिकारणनाशस्यावश्यकत्वादवयविनाश आवश्यकः। न च पटाविनाशेऽपि तन्त्वन्तरसंयोगात् परिमाणाधिक्यं स्यादिति वाच्यम् तत्रापि वेमाद्यभिघातेन असमवायिकारणतन्तुसंयोगनाशात् पटनाशस्यावश्यकत्वात्। किञ्च तन्त्वन्तरस्य तत्पटावयवत्वे पूर्वं तत्पट एव न स्यात् तत्तन्तुरूपकारणाभावात्। तत्तन्त्ववयवत्वाभावे च न तेन परिमाणाधिक्यं संयुक्तद्रव्यान्तरवत्। तस्मात् तत्र तन्त्वन्तरसंयोगे सति पूर्वपटनाशस्ततः पटान्तरोत्पत्तिरित्यवश्यं स्वीकार्य्यम्। अवयविनः प्रत्यभिज्ञानन्तु साजात्येन दीपकलिकादिवत्। न च पूर्वतन्तव एव तन्त्वन्तरसहकारात् पूर्वपटे सत्येव पटान्तरमारभन्त इति वाच्यम् मूर्त्तयोः समानदेशताविरोधात्। एकदा नानाद्रव्य

तथोभयक्रियाजन्यो भवेत् संयोगजोऽपरः।
आदिमः श्येनशैलादिसयोगः परिकीर्त्तितः॥११६
मेषयोः सन्निपातो यः स द्वितीय उदाहृतः।
कपालतरुसंयोगात् संयोगस्तरुकुम्भयोः॥११७॥
तृतीयः स्यात् कर्म्मजोऽपि द्विधैव परिकीर्त्तितः।
अभिघातो नोदनञ्च शब्दहेतुरिहादिमः॥११८॥
शब्दाहेतुर्द्वितीयः स्याद्विभागोऽपि त्रिधा भवेत्।
एककर्म्मोद्भवस्त्वाद्यो द्वयकर्म्मोद्भवोऽपरः॥११९॥
विभागजस्तृतीयः स्यात् तृतीयोऽपि द्विधा भवेत्।

संयोगं निरूपयति। अप्राप्तयोरिति। तं विभजते। कीर्त्तित इति। एष संयोगः॥ ११५॥

सन्निपातः संयोगो द्वितीय उभयकर्म्मजः। तृतीय इति संयोगज इत्यर्थः। तृतीयः स्यादिति पूर्वेणान्वितम्॥ ११६। ११७॥

आदिमः अभिघातः। द्वितीयो नोदनाख्यः संयोग इति। विभक्तप्रत्ययकारणं विभागं निरूपयति। विभाग इति। एककर्म्मेति। उदाहरणन्तु श्येनशैलविभागादि पूर्ववत् बोध्यम्॥ ११८। ११९।

तृतीयो विभागजः कारणमात्रविभागजन्यः कारणाकारणविभागजन्यश्चेति। आद्यस्तावत्। यत्र कपाले कर्म्म ततः कपालद्वयविभागः। ततो घटारम्भकसंयोगनाशः।

परत्वं सूर्य्यसंयोगभूयस्त्वज्ञानतो भवेत् ।
अपरत्वं तदल्पत्वबुद्धितः स्यादितीरितम् ॥१२२॥
तयोरसमवायी तु दिक्संयोगस्तदाश्रये ।
दिवाकरपरिस्पन्दपूर्वोत्पन्नत्वबुद्धितः ॥१२३॥
परत्वमपरत्वन्तु तदनन्तरबुद्धितः ।
अत्र त्वसमवायी स्यात् संयोगः कालपिण्डयोः१२४
अपेक्षाबुद्धिनाशेन नाशस्तेषामुदाहृतः ।
बुद्धेः प्रकारः प्रागेव प्रायशोऽपि निरूपितः॥१२५॥

परापरव्यवहारनिमित्ते परत्वापरत्वे निरूपयति । परत्वञ्चेति ॥ १२१ ॥

दैशिकपरत्वं बहुतरसूर्य्यसंयोगान्तरितत्वज्ञानादुत्पद्यते । एवं तदल्पीयस्त्वज्ञानादपरत्वमुत्पद्यते । अत्रावधित्वार्थं द्वितीयापेक्षा । यथा पाटलिपुत्रात् काशीमपेक्ष्य प्रयागः परः । पाटलिपुत्रात् कुरुक्षेत्रमपेक्ष्य प्रयागोऽपर इति ॥ १२२ ॥

तयोर्दैशिकपरत्वापरत्वयोः । असमवायी असमवायिकारणम् । तदाश्रये दैशिकपरत्वापरत्वाश्रये । दिवाकरेति ।

अत्र परत्वम् अपरत्वञ्च कालिकं ग्राह्यम् । यस्य सूर्य्यपरिस्पन्दापेक्षया यस्य सूर्य्यपरिस्पन्दोऽधिकः स ज्येष्ठः । यस्य न्यूनः स कनिष्ठः । कालिकपरत्वापरत्वे जन्यद्रव्य एव । अत्र कालिकपरत्वापरत्वयोः ॥ १२३ । १२४ ॥

एषां कालिकदैशिकपरत्वानाम् । [illegible]

दोषोऽप्रमाया जनकः प्रमायास्तु गुणो भवेत् ।
पित्तदूरत्वादिरूपो दोषो नानाविधः स्मृतः ॥१३१

उभयसाधारणो यो धर्मस्तज्ज्ञानं संशयकारणम् । यथा उच्चैस्तरत्व स्थाणुत्वसाधारणं ज्ञात्वा अयं स्थाणुर्न वेति सन्दिग्धे। एवम् असाधारणज्ञान कारणम् । यथा शब्दत्वं नित्यानित्यव्यावृत्तं शब्दे गृहीत्वा शब्दो नित्यो न वेति सन्दिग्ध । विप्रतिपत्तिस्तु शब्दो नित्यो न वेत्यादिशब्दात्मिका न संशयकारणम् । शब्दव्याप्तिज्ञानादीनाम् निश्चयमात्रजनकत्वस्वाभाव्यात् । किन्तु तत्र शब्देन कोटिद्वयज्ञान जन्यते । संशयस्तु मानस एवेति । एव ज्ञाने प्रामाण्यसंशयाद् विषयसंशय इति । एवं व्याप्यसंशयादपि व्यापकसंशय इत्यादिकं बोध्यम् । किन्तु संशये धर्मिज्ञानं धर्मीन्द्रियसन्निकर्षो वा कारणमिति ॥ १३० ॥

दोष इति । अप्रमां प्रति दोषः जनककारणम् । प्रमां प्रति गुणः कारणम् । तत्रापि पित्तादिरूपा दोषा अननुगताः । तेषां कारणत्वम् अन्वयव्यतिरेकाभ्यामेव सिद्धम् । गुणस्य प्रमाजनकत्वन्तु अनुमानात् सिद्धम् । यथा प्रमाज्ञानसाधारणकारणभिन्नकारणजन्या जन्यज्ञानत्वात् अप्रमावत् । न च दोषाभाव एव कारणमस्त्विति वाच्यम् पीतः शङ्ख इति ज्ञानस्थले पित्तदोषसत्त्वाच्छुक्लत्वप्रमानुत्पत्तिप्रसङ्गात् । विनिगमनाविरहात् अनन्तदोषाभावस्य कारणत्वमपेक्ष्य गुणकारणताया न्याय्यत्वात् । न च गुणसत्त्वेऽपि पित्तप्रतिबन्धाच्छङ्खे न श्वैत्यज्ञानम् अतः पित्तादिदोषाभावानां

प्रत्यक्षे तु विशेष्येण विशेषणवता समम् ।
सन्निकर्षो गुणस्तु स्यादथ त्वनुमितौ गुणः ॥१
पक्षे साध्यविशिष्टे च परामर्शो गुणो भवेत् ।
शक्ये सादृश्यबुद्धिस्तु भवेदुपमितौ गुणः ॥१३
शाब्दबोधे योग्यतायास्तात्पर्य्यस्याथ वा प्रमा ।
गुणः स्याद् भ्रमभिन्नन्तु ज्ञानमत्रोच्यते प्रमा॥१
अथ वा तत्प्रकारं यज्ज्ञानं तद्विशेष्यकम् ।

कारणत्वमवश्यं वाच्यं तथा च किं गुणस्य हेतुत्वकल्पन येति वाच्यम् तथाप्यन्वयव्यतिरेकाभ्यां गुणस्यापि हेतुत्व सिद्धेः । एव भ्रमं प्रति गुणाभावः कारणमित्यपि सुवचत्वाच्च । तत्र दोषाः के इत्याकाङ्क्षायामाह । पित्तेति । क्वचित् पित्तादिभ्रमे पित्तं दोषः । क्वचिच्चन्द्रादेः स्वल्प परिमाणभ्रमे दूरत्व दोषः । क्वचिच्च वंशोरगभ्रमे मण्डूक वसाञ्जनमित्येव दोषा भ्रान्तिजनका इत्यर्थः ॥ १३१ ॥

अथ के गुणा इत्याकाङ्क्षाया प्रत्यक्षादौ क्रमशो गुणान् दर्शयति । प्रत्यक्षे त्विति । प्रत्यक्षे विशेषणवद्विशेष्यसन्नि गुणः । अनुमितौ साध्यवति साध्यव्याप्यवैशिष्ट्यज्ञानं इति । एवमग्रेऽप्यूह्यः ।

प्रमा निरूपयति । भ्रमभिन्नमिति ॥ १३२ ॥ १३३ ॥ १३४ ॥

ननु यत्र शुक्तिरजतयोरिमे रजते इति ज्ञानं जातं तत्र रजतांशेऽपि प्रमा न स्यात् तज्ज्ञानस्य भ्रमभिन्नत्वा

तत् प्रमा न प्रमा नापि भ्रमः स्यान्निर्विकल्पकम् १३५

प्रकारतादिशून्यं हि सम्बन्धानवगाहि तत्।

भावात् अत आह। अथ वेति तद्वद्विशेष्यक तत्प्रकारकं ज्ञानं प्रमा इत्यर्थः। इदन्तु बोध्यम्। येन सम्बन्धेन तद्वत्ता तेन सम्बन्धेन तद्विशेष्यक तेन सम्बन्धेन तत्प्रकारकत्वं वाच्यम्। तेन कपालादौ संयोगादिना घटादिज्ञाने नातिव्याप्तिः। एवं सति निर्विकल्पकं प्रमा न स्यात् तस्य सप्रकारकत्वाभावात् अत आह। न प्रमेति। ननु वृक्षे कपिसंयोगज्ञानं भ्रमः स्यात् प्रमा च स्यादिति चेत्। न। प्रतियोगिव्यधिकरणसंयोगाभाववति संयोगज्ञानस्य भ्रमत्वात्। न च वृक्षे संयोगाभावावच्छेदकावच्छेदेन संयोगज्ञाने भ्रमो न स्यात् तत्र संयोगाभावस्य प्रतियोगिव्यधिकरणत्वाभावादिति वाच्यम् तत्र संयोगाभावावच्छेदकावच्छेदेन संयोगज्ञानस्य भ्रमत्वात्। लक्षणस्याननुगमात् लक्ष्यानुगमेऽपि न क्षति ॥१३५॥

प्रमात्वमिति। मीमांसका हि प्रमात्वं स्वतो ग्राह्यमिति वदन्ति। तत्र गुरूणां मते ज्ञानस्य स्वप्रकाशरूपत्वात् तज्ज्ञानप्रामाण्यं तेनैव गृह्यते इति। भट्टानां मते ज्ञानमतीन्द्रियम्। ज्ञानजन्या ज्ञातता प्रत्यक्षा। तया च ज्ञानमनुमीयते। मुरारिमिश्राणां मतेऽनुव्यवसायेन ज्ञानं गृह्यते। सर्वेषामपि मते तज्ज्ञानविषयकज्ञानेन तज्ज्ञानप्रामाण्यं गृह्यते। विषयनिरूप्यं हि ज्ञानम्। अतो ज्ञानवित्तिवेद्यो विषयः। तन्मतं दूषयति। न स्वतो

तत् प्रमा न प्रमा नापि भ्रमः स्यान्निर्विकल्पकम्॥१३५
प्रकारतादिशून्यं हि सम्बन्धानवगाहि तत्।

भावात् अत आह। अथ वेति तद्वद्विशेष्यकं तत्प्रकारकं ज्ञानं प्रमा इत्यर्थः। इदन्तु बोध्यम्। येन सम्बन्धेन तद्वत्ता तेन सम्बन्धेन तद्विशेष्यकं तेन सम्बन्धेन तत्प्रकारकत्वं वाच्यम्। तेन कपालादौ संयोगादिना घटादिज्ञाने नातिव्याप्तिः। एवं सति निर्विकल्पकं प्रमा न स्यात् तस्य सप्रकारकत्वाभावात् अत आह। न प्रमेति। ननु वृक्षे कपिसंयोगज्ञानं भ्रमः स्यात् प्रमा च स्यादिति चेत्। न। प्रतियोगिव्यधिकरणसंयोगाभाववति संयोगज्ञानस्य भ्रमत्वात्। न च वृक्षे संयोगाभावावच्छेदकावच्छेदेन संयोगज्ञानं भ्रमो न स्यात् तत्र संयोगाभावस्य प्रतियोगिव्यधिकरणत्वाभावादिति वाच्यम् तत्र संयोगाभावावच्छेदकावच्छेदेन संयोगज्ञानस्य भ्रमत्वात्। लक्ष्यस्याननुगमात् लक्षणाननुगमेऽपि न क्षतिः॥१३५॥

प्रमात्वमिति। मीमांसका हि प्रमात्वं स्वतो ग्राह्यमिति वदन्ति। तत्र गुरूणां मते ज्ञानस्य स्वप्रकाशरूपत्वात् तज्ज्ञानप्रामाण्यं तेनैव गृह्यते इति। भट्टानां मते ज्ञानमतीन्द्रियम्। ज्ञानजन्या ज्ञातता प्रत्यक्षा। तया च ज्ञानमनुमीयते। मुरारिमिश्राणां मतेऽनुव्यवसायेन ज्ञानं गृह्यते। सर्वेषामपि मते तज्ज्ञानविषयकज्ञानेन तज्ज्ञानप्रामाण्यं गृह्यते। विषयनिरूप्यं हि ज्ञानम्। अतो ज्ञानवित्तिवेद्यो विषयः। तन्मतं दूषयति। न स्वतो

मितौ प्रामाण्यसंशये न तस्य विषयनिश्चयरूपत्वात्तत्र प्रामा-
ण्यग्रहो वाच्यः सोऽप्यनुमित्यन्तरेणेति फलमुखी कारणमुखी
वा नानवस्थेति चेन्न अगृहीताप्रामाण्यकस्यैव निश्चय-
रूपत्वात् । यत्र च प्रामाण्यसंशयस्तत्रैव परं प्रामाण्यानु-
मितेरपेक्षया यावदाग्रहं प्रामाण्यानुमितिरिष्यत एव सर्वत्र
तु न संशयः क्वचित् कोट्यनुपस्थितेः क्वचिद्विशेषदर्शनादितः
क्वचिद्विषयान्तरसञ्चारादिति संक्षेपः । ननु सर्वेषां ज्ञानानां
यथार्थत्वात् प्रमालक्षणे तद्विशेष्यकत्व विशेषण व्यर्थम् ।
न च रङ्गे रजतार्थिनः प्रवृत्तिर्भ्रमजन्या न स्यात् तत्र
मते भ्रमस्याभावादिति वाच्यम् । तत्र हि दोषा-
धीनस्य पुरोवर्तिनि स्वतन्त्रोपस्थितरजतभेदाग्रहस्य हेतु-
त्वात् । सत्यरजतस्थले तु विशिष्टज्ञानस्य सत्त्वात् तदेव
कारणम् । अस्तु वा तत्रापि भेदाग्रह एव कारणमिति ।
न वाऽन्यथाख्यातिः सम्भवति । रजतप्रत्यक्षकारणस्य
रजतसन्निकर्षस्याभावात् रङ्गे रजतबुद्धेरनुपपत्तेरिति चेन्न
सत्यरजतस्थले प्रवृत्तिं प्रति विशिष्टज्ञानस्य हेतुतायाः
क्लृप्तत्वात् अन्यत्रापि तत्कल्पनात् । न च संवादप्रवृत्तौ
तत् कारणं विसंवादिप्रवृत्तौ तु भेदाग्रहः कारणमिति
वाच्यम् लाघवात् प्रवृत्तिमात्रे तस्य हेतुत्वकल्पनात् । इत्थञ्च
रङ्गे रजतत्वविशिष्टबुद्ध्यनुरोधेन ज्ञानलक्षणाप्रत्यासत्तिकल्प-
नेऽपि न क्षतिः । फलमुखगौरवस्यादोषत्वात् । किञ्च यत्र
रङ्गरजतयोरिमे रजते इति ज्ञानं जातं तत्र न कारण-
बाधोऽपि । अपि च यत्र रङ्गरजतयोरिमे रजतरङ्गे इति
ज्ञानं तत्रोभयत्र युगपत्प्रवृत्तिनिवृत्ती स्याताम् । रङ्गे रङ्ग-

साध्यस्य व्यापको यस्तु हेतोरव्यापकस्तथा।
स उपाधिर्भवेत्तस्य निष्कर्षोऽयं प्रदर्श्यते ॥१३८॥

क्वचित् कारणं विनापि भविष्यति अहेतुक एव वा भविष्यतीति तत्राशङ्का भवति तदा सा व्याघातादपसरणीया। यदि कारणं विना कार्य्यं स्यात् तदा धूमार्थं वह्नेस्तृप्त्यर्थं भोजनस्य नियमत उपादानं तवैव न स्यादिति। यत्र स्वत एव शङ्का नावतरति तत्र न तर्कापेक्षापीति तदिदमुक्तं तर्कः क्वचित् शङ्कानिवर्त्तक इति ॥ १३७ ॥

इदानीं परकीयव्याप्तिग्रहप्रतिबन्धार्थमुपाधिं निरूपयति। साध्यस्येति। साध्यत्वाभिमतव्यापकत्वे सति साधनत्वाभिमताव्यापक इत्यर्थः। ननु स श्यामो मित्रातनयत्वाद् इत्यत्र शाकपाकजत्वं नोपाधिः स्यात्। तस्य साध्यव्यापकत्वाभावात्। श्यामत्वस्य घटादावपि सत्त्वात्। एवं वायुः प्रत्यक्षः स्पर्शाश्रयत्वाद् इत्यत्र उद्भूतरूपवत्त्वं नोपाधिः स्यात्। प्रत्यक्षत्वस्यात्मादिषु सत्त्वात् तत्र रूपाभावात्। एवं ध्वंसो विनाशी जन्यत्वाद् इत्यत्र भावत्वं नोपाधिः स्याद् विनाशित्वस्य प्रागभावे सत्त्वात्। तत्र च भावत्वाभावादिति चेन्न। यद्धर्म्मावच्छिन्नसाध्यव्यापकत्वं तद्धर्म्मावच्छिन्नसाधनाव्यापकत्वमित्यर्थतात्पर्य्यात्। मित्रातनयत्वावच्छिन्नश्यामत्वस्य व्यापकं शाकपाकजत्वम्। एवं बहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्वस्य व्यापकमुद्भूतरूपवत्त्वं बहिर्द्रव्यत्वावच्छिन्नसाधनस्याव्यापकञ्च। एवं ध्वंसो विनाशी जन्यत्वादित्यत्र जन्यत्वावच्छिन्नसाध्यव्यापकं भावत्वम्।

अनुमानगतार्थत्वादिति वैशेषिकं मतम् ।
तन्न सम्यग्विना व्याप्तिबोधं शाब्दादिबोधतः ॥१४१॥

[illegible] व्यभिचारित्वादिति । [illegible] व्यापकताग्राहकप्रमाणाभावात् [illegible] नोपाधिः । बाधोन्नीतस्तु पक्षेतरत्वम् उपाधिः [illegible] यदि- [illegible] पक्षेतरत्वमुपाधिः । यत्र साध्यव्यापकत्वादि सन्दि- ग्धं स सन्दिग्धोपाधिः । पक्षेतरन्तु सन्दिग्धोपाधिरपि नोद्भावनीयं कथकसम्प्रदायानुरोधादिति । केचित्तु सत्प्र- तिपक्षोत्थापनमुपाधिफलम् । तथा हि अयोगोलकं धूम- वद्वह्नेरित्यादौ अयोगोलकं धूमाभाववद् आर्द्रेन्धनाभावाद् इति सत्प्रतिपक्षसम्भवात् । इत्थञ्च साधनव्यापकोऽपि क्वचिदुपाधिः । यथा ध्वस्ता पृथिवी कठिनसंयोगवत्त्वा- दित्यादौ अनुष्णाशीतस्पर्शवत्त्वम् । न चात्र स्वरूपमनुपा- धिरेव दूषणमिति वाच्यम् । सर्व्वोपाधेर्दूषणान्तरसाङ्क- र्य्यात् । अत्र च साध्यव्यापकपक्षावृत्तिरुपाधिरिति वदन्ति । शब्दोपमानयोरिति ॥ १४० ॥

वैशेषिकाणां मते प्रत्यक्षमनुमानञ्च प्रमाणं शब्दोपमान- योरनुमानविधयैव प्रामाण्यम् । तथा हि दण्डेन गामभ्या- जेत्यादिपदानि वैदिकपदानि वा तात्पर्य्यविषयस्मारित- पदार्थसंसर्गज्ञानपूर्व्वकाणि आकाङ्क्षादिमत्पदकदम्बत्वाद् घटमानयेतिपदकदम्बवत् । यद्वा एते पदार्था मिथः संसर्ग-

साध्याभावव्यापकत्वं हेत्वभावस्य यद्भवेत् ।
अर्थापत्तिस्तु नैवेह प्रमाणान्तरमिष्यते ॥१४३॥

जलादित्रयोदशभेदस्य पूर्वमनिश्चिततया निश्चितसाध्यवतः सपक्षस्याभाव इति । सत्सपक्षविपक्षोऽन्वयव्यतिरेकी । यथा वह्निमान् धूमादित्यादौ । तत्र सपक्षस्य महानसादेर्विपक्षस्य जलह्रदादेश्च सत्त्वादिति ॥ १४२ ॥

तत्र व्यतिरेकिणि व्यतिरेकव्याप्तिज्ञानं कारणं तदर्थं व्यतिरेकव्याप्तिं निर्वक्ति । साध्याभावव्यापकत्वं हेत्वभावस्य यद्भवेद् इति । साध्याभावव्यापकीभूताभावप्रतियोगित्वमित्यर्थः । अत्रेदं बोध्यम् । येन सम्बन्धेन यत्र येन रूपेण व्यापकता गृह्यते तत्सम्बन्धावच्छिन्नप्रतियोगिताकतद्धर्मावच्छिन्नाभाववत्ताज्ञानात् यत्सम्बन्धेन यद्धर्मावच्छिन्नस्य व्याप्यता गृह्यते तत्सम्बन्धावच्छिन्नप्रतियोगिताकतद्धर्मावच्छिन्नाभावस्य सिद्धिः । इत्थञ्च यत्र विशेषणतादिसम्बन्धेनेतरत्वव्यापकत्वं गन्धाभावे गृह्यते तत्र गन्धाभावाभावेनेतरत्वात्यन्ताभावः सिध्यति । यत्र तु तादात्म्यसम्बन्धेनेतरव्यापकता गृह्यते तत्र तादात्म्यसम्बन्धेनेतरस्याभावः सिध्यति । स एवान्योन्याभावः । एवं यत्र संयोगसम्बन्धेन धूमं प्रति संयोगसम्बन्धेन वह्नेर्व्यापकता गृह्यते तत्र संयोगसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्यभावेन जलह्रदे संयोगसम्बन्धावच्छिन्नप्रतियोगिताकधूमाभावः सिध्यति । अत एव व्यतिरेकव्याप्तिग्रहे व्यतिरेकसहचारज्ञानं कारणम् । केचित्तु व्यतिरेकसहचारेणान्वयव्याप्तिरेव गृह्यते न तु

अधर्मजन्यं दुःखं स्यात् प्रतिकूलं सचेतसाम् ।
निर्दुःखत्वे सुखे चेच्छा तज्ज्ञानादेव जायते १४५
इच्छा तु तदुपाये स्यादिष्टोपायत्वधीर्यदि ।
चिकीर्षा कृतिसाध्यत्वप्रकारेच्छा तु या भवेत् १४६
तद्धेतुः कृतिसाध्येष्टसाधनत्वमतिर्भवेत् ।
बलवद्द्विष्टहेतुत्वमतिः स्यात् प्रतिबन्धिका॥१४७

जन्यत इति । काम्यमभिलापविषयः । धर्म्मेति धर्म्मत्वेन सुखत्वेन कार्य्यकारणभाव इत्यर्थः ॥१४४॥

दुःख निरूपयति । अधर्म्मेति । अधर्म्मत्वेन दुःखत्वेन कार्य्यकारणभाव इत्यर्थः । प्रतिकूलमिति दुःखत्वज्ञानादेव सर्वेषां स्वाभाविकविषय इत्यर्थः । इच्छां निरूपयति । निर्दुःखत्व इति ॥१४५॥

इच्छा हि फलविषयिणी उपायविषयिणी च । फलन्तु सुखं दुःखाभावश्च । तत्र फलेच्छां प्रति फलज्ञानं कारणम् । अत एव स्वतः पुरुषार्थः सम्भवति । यज्ज्ञान सत् स्ववृत्तितयेष्यते स स्वतः पुरुषार्थ इति तल्लक्षणात् । इतरेच्छानधीनेच्छाविषयत्वं फलितोऽर्थः । उपायेच्छां प्रतीष्टसाधनताज्ञान कारणम् । चिकीर्षेति । कृतिसाध्यत्वप्रकारिका कृतिसाध्यक्रियाविषयिणीच्छा चिकीर्षा । पाकं कृत्वा साधयामीति तदनुभावात् ॥ १४६ ॥

चिकीर्षां प्रति कृतिसाध्यताज्ञानमिष्टसाधनताज्ञानञ्च कारणम् । अत एव वृष्ट्यां कृतिसाध्यताभावान्न चिकीर्षा ।

अधर्मजन्यं दुःखं स्यात् प्रतिकूलं सचेतसाम्।
निर्दुःखत्वे सुखे चेच्छा तज्ज्ञानादेव जायते॥१४५
इच्छा तु तदुपाये स्यादिष्टोपायत्वधीर्यदि।
चिकीर्षा कृतिसाध्यत्वप्रकारेच्छा च या भवेत्॥१४६
तद्धेतुः कृतिसाध्येष्टसाधनत्वमतिर्भवेत्।
बलवद्द्विष्टहेतुत्वमतिः स्यात् प्रतिबन्धिका॥१४७

जन्यत इति। काम्यमभिलाषविषयः। धर्मेति धर्मत्वेन सुखत्वेन कार्य्यकारणभाव इत्यर्थः॥१४४॥

दुःखं निरूपयति। अधर्मेति। अधर्मत्वेन दुःखत्वेन कार्य्यकारणभाव इत्यर्थः। प्रतिकूलमिति दुःखत्वज्ञानादेव सर्वेषां स्वाभाविकविषय इत्यर्थः। इच्छां निरूपयति। निर्दुःखत्व इति॥१४५॥

इच्छा हि फलविषयिणी उपायविषयिणी च। फलन्तु सुखं दुःखाभावश्च। तत्र फलेच्छां प्रति फलज्ञानं कारणम्। अत एव स्वतः पुरुषार्थः सम्भवति। यज्ज्ञाने सत् स्ववृत्तितयेष्यते स स्वतः पुरुषार्थ इति तल्लक्षणात्। इतरेच्छानधीनेच्छाविषयत्वं फलितोऽर्थः। उपायेच्छां प्रतीष्टसाधनताज्ञानं कारणम्। चिकीर्षेति। कृतिसाध्यत्वप्रकारिका कृतिसाध्यक्रियाविषयिणीच्छा चिकीर्षा। पाकं कृत्या साधयामीति तदनुभावात्॥१४६॥

चिकीर्षां प्रति कृतिसाध्यताज्ञानमिष्टसाधनताज्ञानञ्च कारणम्। अत एव वृष्ट्यां कृतिसाध्यताभावान्न चिकीर्षा।

उपादानस्य चाध्यक्षं प्रवृत्तौ जनकं भवेत् ॥१५०॥

कार्यताज्ञानं प्रवर्तकमिति गुरवः । तथा हि ज्ञानस्य प्रवृत्तौ जननीयायां चिकीर्षातिरिक्तं नापेक्षितमस्ति । सा च कृतिसाध्यताज्ञानसाध्या । इच्छायाः स्वप्रकारकप्रकारकधीसाध्यत्वनियमात् चिकीर्षा हि कृतिसाध्यत्वप्रकारिकेच्छा । तत्र कृतिसाध्यत्वं प्रकारस्तत्प्रकारकज्ञानं चिकीर्षायां तद्द्वारा प्रवृत्तौ च हेतुः । न त्विष्टसाधनताज्ञानं तत्र हेतुः । कृत्यसाध्येऽपि प्रवृत्त्यापत्तेः । कृत्यसाध्यताज्ञानं प्रतिबन्धकमिति चेन्न । तदभावापेक्षया कृतिसाध्यताज्ञानस्य लघुत्वात् । न च द्वयोरपि हेतुत्वं गौरवात् । ननु तृप्तस्यापि मधुविषसंपृक्तान्नभोजने चैत्यवन्दने च प्रवृत्त्यापत्तिः कार्यताज्ञानसत्त्वादिति चेन्न । स्वविशेषणवत्ताप्रतिसन्धानजन्यकार्यताज्ञानस्य प्रवर्तकत्वात् । काम्ये हि यागपाकादौ कामना स्वविशेषणम् । ततश्च बलवदनिष्टाननुबन्धित्वसाधनताज्ञानेन कार्यताज्ञानम् । ततः प्रवृत्तिः । तृप्तश्च भोजने न प्रवर्तते । तदानीं कामनायाः पुरुषविशेषणत्वाभावात् । नित्ये च शौचादिकं पुरुषविशेषणम् । तेन शौचादिज्ञानाधीनकृतिसाध्यताज्ञानात् तत्र प्रवृत्तेः । ननु तदपेक्षया लाघवेन बलवदनिष्टाननुबन्धीष्टसाधनताविषयकार्यताज्ञानमेव हेतुरस्तु बलवदनिष्टाननुबन्धित्वञ्च इष्टोत्पत्तिनान्तरीयकदुःखाधिकदुःखाजनकत्वं बलवद्द्वेषविषयदुःखाजनकत्वं वेति चेन्न । इष्टसाधनत्वकृतिसाध्यत्वयोर्युगपद्ज्ञानासम्भवात् । साध्यत्वसाधन-

उपादानस्य चाध्यक्षं प्रवृत्तौ जनकं भवेत् ॥१५०॥

कार्य्यताज्ञानं प्रवर्त्तकमिति गुरवः। तथा हि ज्ञानस्य प्रवृत्तौ जननीयायां चिकीर्षातिरिक्तं नापेक्षितमस्ति। सा च कृतिसाध्यताज्ञानसाध्या। इच्छायाः स्वप्रकारप्रकारकधीसाध्यत्वनियमात् चिकीर्षा हि कृतिसाध्यत्वप्रकारिकेच्छा। तत्र कृतिसाध्यत्वं प्रकारस्तत्प्रकारकज्ञानं चिकीर्षायां तद्द्वारा प्रवृत्तौ च हेतुः। न त्विष्टसाधनताज्ञानं तत्र हेतुः। कृत्यसाध्येऽपि प्रवृत्त्यापत्तेः। कृत्यसाध्यताज्ञानं प्रतिबन्धकमिति चेन्न। तदभावापेक्षया कृतिसाध्यताज्ञानस्य लघुत्वात्। न च द्वयोरपि हेतुत्वं गौरवात्। ननु तन्मतेऽपि मधुविषसंपृक्तान्नभोजने चैत्यवन्दने च प्रवृत्त्यापत्तिः कार्य्यताज्ञानसत्त्वादिति चेन्न। स्वविशेषणवत्ताप्रतिसन्धानजन्यकार्य्यताज्ञानस्य प्रवर्त्तकत्वात्। काम्ये हि यागपाकादौ कामना स्वविशेषणम्। ततश्च बलवदनिष्टाननुबन्धिकाम्यसाधनताज्ञानेन कार्य्यताज्ञानम्। ततः प्रवृत्तिः। तृप्तश्च भोजने न प्रवर्त्तते। तदानीं कामनायाः पुरुषविशेषणत्वाभावात्। नित्ये च शौचादिकं पुरुषविशेषणम्। तेन शौचादिज्ञानाधीनकृतिसाध्यताज्ञानात् तत्र प्रवृत्तेः। ननु तदपेक्षया लाघवेन बलवदनिष्टाननुबन्धीष्टसाधनताविषयककार्य्यताज्ञानमेव हेतुरस्तु बलवदनिष्टाननुबन्धित्वञ्च द्वेषोत्पत्तिनान्तरीयकदुःखाधिकदुःखाजनकत्वं बलवद्द्विष्टविषयदुःखाजनकत्वं वेति चेन्न। इष्टसाधनत्वकृतिसाध्यत्वयोर्युगपज्ज्ञातुमशक्यत्वात्। साध्यत्वसाधन-

न प्रवृत्तिः । प्रत्युत सर्वस्वनाशोपाधिभिरपि स्मरणैः ।
इत्यत शिरश्छिन्ना यदि न इत्यादौ च फलं न स्यादिति
कर्म कर्त्तुं तत्परः । नन्वेवञ्च स्वल्पाम्नायोक्तिरन्यादौ
इष्टानुबन्धे प्रवृत्तिः कथम् । न चार्थवादिकफलमोक्षादि
फलवादोऽसन्नेव वा फलमिति वाच्यम् । तथा सति काम्यत्वे
नित्यत्वव्याघातः । कामनाभावेऽकरणापत्तेश्च । इष्टञ्च
फलश्रुतिश्रवणादिकमत्रापीति चेन्न । ग्रहणस्नानादौ नित्य
त्वनैमित्तिकत्वयोरिव सन्ध्यादौ काम्यत्वनैमित्तिकत्वयो-
रिव नित्यत्वकाम्यत्वयोरप्यविरोधात् । न च कामनाभावे-
ऽकरणापत्तिः । नित्यस्वाध्यायपाठादाविव कामनानङ्गत्व-
स्यैव कल्पनात् । ननु वेदबोधितकार्यताज्ञानात् प्रवृत्ति-
रुत्पद्यत इति चेन्न । इष्टसाधनत्वज्ञानं विना तादृशकार्यता-
ज्ञानस्यासत्त्वेऽपि प्रवृत्तेरदर्शनात् । यदपि पापक्षयः फल-
मिति तदपि न । कामनाभावेऽकरणापत्तेस्तौल्यात् ।
कामनाकल्पने त्वर्थवादिकफलस्यैव रात्रिसत्रन्यायात् कल्प-
नाल्लघुतया प्रवृत्त्युपपत्तेः । तेन ।

सद्य वैदिकयुक्तस्य दुरितस्य प्रचक्षते ।
अनुष्ठितं तथा सान्ध्ये फलवादस्य गम्यते ॥

एवम् ।

सन्ध्यामुपासते ये तु सततं संशितव्रताः ।
विधूतपापास्ते यान्ति ब्रह्मलोकमनामयम् ॥

एवम् ।

दद्यादहरहः श्राद्धं पितृभ्यः प्रीतिमावहन् ।

पूर्वोदितस्यैव फलमस्तु । न च पितृप्रीति कथं फल कामि-

स्यात्तत्रधत्वापत्तिश्चेति वाच्यम्। मरणोद्देश्यकत्वस्यापि विशेषणत्वात्। अत एव सप्तमीतैलाभ्यङ्गस्य न हिंसात्वम्। अन्योद्देश्यकच्छिन्ननाराचहतब्राह्मणस्य तु वाचनिकं प्रायश्चित्तमिति चेन्न। श्येनवारणायादृष्टाद्वारकत्वेन विशेषणात्। अत एव काशीमरणाद्यर्थकृतशिवपूजादेरपि न हिंसात्वम्। न च साक्षान्मरणजनकस्यैव हिंसात्वं श्येनस्तु न तथा किन्तु तज्जन्यापूर्वमिति वाच्यम्। खड्गाघातेन ब्राह्मणे व्रणपाकपरम्परया मृते हिंसात्वानापत्तेः। केचित् तु श्येनस्य हिंसाफलं न तु मरणम्। श्येनजन्यखड्गघातादिरूपा हिंसा अभिचारपदार्थः। तस्य च पापजनकत्वम्। अतः श्येनस्य वैधत्वात् पापजनकत्वेऽपि अग्रिमपापं प्रतिसन्धाय सन्तो न प्रवर्त्तन्ते। आचार्य्यास्तु आप्ताभिप्रायो विध्यर्थः। पाकं कुर्य्याद् इत्यादौ आज्ञानिरूप्येच्छावाचित्वाल्लिङ्गादावस्येच्छावाचित्वं लाघवात्। एवञ्च स्वर्गकामो यजेतेत्यादौ यागः स्वर्गकामकृतिसाध्यतयाऽभीष्ट इत्यर्थः। तत आप्तेष्टत्वेनेष्टसाधनत्वादिकमनुमाय प्रवर्त्तते। कलञ्जभक्षणादौ तदभावान्न प्रवर्त्तते। यस्तु वेदे पौरुषेयत्वं नाभ्युपैति तं प्रति विधिरेव तावत्कर्म इव श्रुतिः कुमार्य्याः पुयोगे मानम्। न च कर्त्तृस्मरणं बाधकम्। कपिलकणादादिकमारभ्याद्यपर्य्यन्तं कर्तृस्मरणस्यैव प्रतीयमानत्वात्। अन्यथा स्मृतीनामप्यकर्तृकत्वापत्तेः। तथैव कर्तृस्मरणमस्तीति चेद्वेदेऽपि छन्दांसि जज्ञिरे तस्मादित्यादिकर्तृस्मरणसत्त्वेव। एव प्रति मन्वन्तर वेदा स्मृतिरन्या विधीयत इत्यपि द्रष्टव्यम्।

निवृत्तिस्तु भवेद् द्वेषाद् द्विष्टसाधनता धियः।
यत्नो जीवनयोनिस्तु सर्वदातीन्द्रियो भवेत्॥१५१॥
शरीरे प्राणसञ्चारकारणं परिकीर्त्तितम्।
अतीन्द्रियं गुरुत्वं स्यात् पृथिव्यादिद्वये तु तत्॥१५२

स्वयम्भुरेष भगवान् वेदो गीतस्त्वया पुरा।
शिवाद्या ऋषिपर्य्यन्ताः स्मर्त्तारोऽस्य न कारकाः॥
इति वेदस्य स्तुतिमात्रम्। न च पौरुषेयत्वे भ्रमादिसम्भवादप्रामाण्यं स्यादिति वाच्यम्। नित्यसर्वज्ञत्वेन निर्दोषत्वात्। अत एव पुरुषान्तरभ्रमादिसम्भवान्न कपिलादेः कर्त्तृत्वं वेदस्य। किञ्च वर्णानामेवानित्यत्वस्य वक्ष्यमाणत्वात् सुतरां तत्सन्दर्भस्य वेदस्यानित्यत्वमिति। उपादानस्येति। उपादानस्य समवायिकारणस्याध्यक्षं प्रवृत्तौ कारणमिति॥१५०॥

द्विष्टसाधनताज्ञानस्य दुःखसाधनविषयकनिवृत्तिं प्रति [illegible] भावः। यत्न इति। [illegible] यावज्जीवनमनुवर्त्तते। स चाती[illegible]:॥१५१॥

प्रमाणमाह। शरीरे प्राणसञ्चारकारणं परिकी[illegible]त। प्राणसञ्चारो हि अधिकः श्वासादिः प्रयत्न[illegible] इत्यस्य प्राणसञ्चारस्य यत्नसाध्यत्वानुमानात् प्रत्य[illegible] बाधाच्चातीन्द्रिययत्नसिद्धिः। स एव जीवनयो[illegible]। गुरुत्वं निरूपयति। अतीन्द्रियमिति॥१५२॥

अनित्ये तदनित्यं स्यान्नित्ये नित्यमुदाहृतम् ।
तदेवासमवायि स्यात् पतनाख्ये तु कर्मणि॥१५३
सांसिद्धिकद्रवत्वं स्यान्नैमित्तिकमथापरम् ।
सांसिद्धिकन्तु सलिले द्वितीयं चितितेजसोः१५४
परमाणौ जले नित्यमन्यत्रानित्यमुच्यते ।
नैमित्तिकं वह्नियोगात्तपनीयघृतादिषु ॥१५५॥
द्रवत्वं स्यन्दने हेतुर्निमित्तं संग्रहे तु तत् ।

अनित्ये द्व्यणुकादौ तद्गुरुत्वमनित्यम्। नित्ये परमाणौ नित्यम्। गुरुत्वमित्यनुवर्त्तते। तद्गुरुत्वम् असमवायि असमवायिकारणम्। पतने आद्यपतने इत्यर्थः॥१५३॥

द्रवत्वं निरूपयति। सांसिद्धिकमिति। द्रवत्वं द्विविधं सांसिद्धिकं नैमित्तिकञ्चेति। द्वितीयं नैमित्तिकं परमाणाविति॥१५४॥

जलपरमाणौ द्रवत्वं नित्यम्। अन्यत्र पृथिवीपरमाण्वादौ जलद्व्यणुकादौ च द्रवत्वमनित्यम्। गुवर्चित्तेजसि कुत्रचित् पृथिव्याञ्च नैमित्तिकं द्रवत्वम्। तत्र कौ वा नैमित्तिकमुपदर्शयति। नैमित्तिकमिति। वह्नीतिपदं तेजोऽर्थकम्। तथा च तेजःसंयोगाग्निसंयोगजन्यं नैमित्तिकं द्रवत्वम्। तच्च सुवर्णादिरूपे तेजसि घृतजतुप्रभृतिपृथिव्यां वर्त्तत इत्यर्थः॥१५५॥

द्रवत्वं स्यन्दने हेतुर्निमित्तं सङ्ग्रहे तु तदिति। हेतुरिति असमवायिकारणमित्यर्थः। सङ्ग्रहे सक्त्वादिसंयो-

अतीन्द्रियोऽसौ विज्ञेयः क्वचित् स्पन्देऽपि कारणम्
भावनाख्यस्तु संस्कारो जीववृत्तिरतीन्द्रियः॥१५९॥
उपेक्षानात्मकस्तस्य निश्चयः कारणं भवेत्।
स्मरणे प्रत्यभिज्ञायामप्यसौ हेतुरुच्यते॥१६०॥

वेगे दुर्बलत्वं स्थितिस्थापकबाधकत्वात्। क्वचिदिति। स्पन्दे इत्यादिषु स्थितिस्थापकं निमित्तमिति तद्भावा-मिति भावः॥१५८॥

असौ स्थितिस्थापकः। क्वचित् शाखादिनमनादौ। भाव-नाख्य इति॥१५९॥

तस्य संस्कारस्य। उपेक्षात्मकज्ञानात् संस्कारानुत्पत्ते-रुपेक्षानात्मक इत्युक्तम्। तद्भेदत्वात् संस्कारानुत्पत्ते-र्निश्चय इत्युक्तम्। ज्ञानोपेक्षान्यनिश्चयत्वेन संस्कारं प्रति हेतुरिति भावः। ननु स्मरणं ज्ञानोपेक्षान्यनिश्चयत्वेन हेतुत्वं नोपेक्षादिसत्त्वे न स्मरणम् इत्यत्र संस्कारं प्रति ज्ञानत्वेनैव हेतुत्वमिति चेन्न। निर्विकल्पकादिवारणायापि संस्कारं प्रति उपेक्षान्यनिश्चयत्वेन हेतुतायाः सिद्धत्वात्। किञ्च उपेक्षा-त्मके संस्कारजननाभावात् संस्कारं प्रति उपेक्षान्य-त्वेन हेतुतायाः सिद्धत्वात्। तत्र प्रमाणं दर्शयति। स्मरणे प्रत्यभिज्ञायामप्यसौ हेतुरुच्यते इति। असौ संस्कारः स्मरणं प्रत्यभिज्ञानञ्च जनयति। अतः संस्कारः कल्प्यते। विना व्यापारं पूर्वानुभवस्य स्मरणादिजनकत्वासम्भवात्। व्यवधानाद्यनन्तराभावे कारणत्वासम्भवात्। न च प्रत्य-



अधर्म्मो नरकादीनां हेतुर्निन्दितकर्म्मजः ॥१६२॥
प्रायश्चित्तादिनाश्योऽसौ जीववृत्ती त्विमौ गुणौ।
इमौ तु वासनाजन्यौ ज्ञानादपि विनश्यतः॥१६३

विरध्वस्तस्य कथं कारणत्वमिति वाच्यम्। अनन्यथासिद्ध-नियतपूर्ववर्त्तित्वस्य तत्रापि सत्त्वात्। अव्यवहितपूर्व-वर्त्तित्वं हि चक्षुःसंयोगादेः कारणत्वं न तु सर्वत्र कार्य्य-कालवृत्तित्वमिव समवायिकारणस्य कारणत्वमित्यत आह। कर्म्मनाश।जलस्पर्शादिना नाश्यस्त्वसौ मत इति। यदि हि अपूर्वं न स्यात् तदा कर्म्मनाशाजलस्पर्शादिना नाश्यत्वं धर्म्मस्य न स्यात्। न हि तेन यागादिनाशः प्रतिबन्धो वा कर्त्तुं शक्यते। तस्य पूर्वमेव वृत्तत्वादिति। एतेन देवताप्रीतिरेव फलमित्यपास्तम्। गङ्गास्नानादौ सर्वत्र देवताप्रीतेरसम्भवात्। देवतायाचेतनत्वेऽपि तत्प्रीतेरनु-द्देश्यत्वात्। प्रीतेः सुखस्वरूपत्वेन विष्णुप्रीत्यादौ तदसम्भ-वात्। जन्यसुखादेस्तत्राभावात्। तेन विष्णुप्रीतिजन्य-त्वेन पराभिमतस्वर्गादिरेव विष्णुप्रीतिशब्देन लक्ष्यते। अधर्म्मो नकारादीना हेतुर्निन्दितकर्म्मज इति। नरक-दुःखादिसकलदुःखाना नारकिशरीरादीनाञ्च साधनमधर्म्म इत्यर्थः ।१६२।

प्रमाणमाह। प्रायश्चित्तादिनाश्योऽसौ। जीववृत्ती त्विमौ गुणाविति। यदि ह्यधर्म्मो न स्यात् तदा प्राय-श्चित्तादिनाश्यत्वं न स्यात्। न हि तेन ब्रह्महननादीनां

नित्यत्वम्। इत्थं चोत्पादविनाशबुद्धिभ्रमरूपा चेत्तत आह। सोऽयं क इति बुद्धिस्तु साजात्यमवलम्बते। तदेवौषध मित्यादौ सजातीयेऽपि दर्शनादिति। तत्र प्रत्यभिज्ञानस्य तत्सजातीयत्वं विषयो न तु तद्व्यक्त्यभेदो विषयः। उक्त प्रतीतिविरोधात्। इत्थञ्च द्वयोरपि बुद्ध्योर्न भ्रमत्वमिति। ननु सजातीयत्वं सोऽयमितिप्रत्यभिज्ञायां भासते इति कुत्र दृष्टमित्यत आह। तदेवेति। यदौषधं मया कृत तदेवा न्येनापि कृतमित्यादिदर्शनादिति भावः॥ १६७॥

इति श्रीमहामहोपाध्याय विद्यानिवास भट्टाचार्य सुत
श्रीविश्वनाथपञ्चाननभट्टाचार्यविरचिता
सिद्धान्तमुक्तावली सम्पूर्णा।
